2) 4.7.10.2(2)- वेहत् । च । मे ।

वेहच् च च वेहद् वेहच् च मे मे च वेहद् वेहच् च मे ।

3) 4.7.10.2(3)- च । मे । अनड्वान् ।

च मे मे च च मे ऽनड्वा ननड्वान् मे च च मे ऽनड्वान् ।

4) 4.7.10.2(4)- मे । अनड्वान् । च ।

मे ऽनड्वा ननड्वान् मे मे ऽनड्वान् च चानड्वान् मे मे ऽनड्वान् च ।

5) 4.7.10.2(5)- अनड्वान् । च । मे ।

अनड्वान् च चानड्वा ननड्वान् च मे मे चानड्वा ननड्वान् च मे ।

6) 4.7.10.2(6)- च । मे । धेनुः ।

च मे मे च च मे धेनुर् धेनुर् मे च च मे धेनुः ।

7) 4.7.10.2(7)- मे । धेनुः । च ।

मे धेनुर् धेनुर् मे मे धेनुश्च च धेनुर् मे मे धेनुश्च ।

8) 4.7.10.2(8)- धेनुः । च । मे ।

धेनुश्च च धेनुर् धेनुश्च मे मे च धेनुर् धेनुश्च मे ।

9) 4.7.10.2(9)- च । मे । आयुः ।

च मे मे च च म आयु रायुर् मे च च म आयुः ।

10) 4.7.10.2(10)- मे । आयुः । यज्ञेन ।

म आयु रायुर् मे म आयुर् यज्ञेन यज्ञे नायुर् मे म आयुर् यज्ञेन ।

11) 4.7.10.2(11)– आयुः । यज्ञेन । कल्पताम् ।

आयुर् यज्ञेन यज्ञेनायु रायुर् यज्ञेन कल्पताम् कल्पतां ँयज्ञेनायु रायुर् यज्ञेन कल्पताम् ।

12) 4.7.10.2(12)– यज्ञेन । कल्पताम् । प्राणः ।

यज्ञेन कल्पताम् कल्पतां ँयज्ञेन यज्ञेन कल्पताम् प्राणः प्राणः कल्पतां ँयज्ञेन यज्ञेन कल्पताम् प्राणः ।

13) 4.7.10.2(13)– कल्पताम् । प्राणः । यज्ञेन ।

कल्पताम् प्राणः प्राणः कल्पताम् कल्पताम् प्राणो यज्ञेन यज्ञेन प्राणः कल्पताम् कल्पताम् प्राणो यज्ञेन ।

14) 4.7.10.2(14)– प्राणः । यज्ञेन । कल्पताम् ।

प्राणो यज्ञेन यज्ञेन प्राणः प्राणो यज्ञेन कल्पताम् कल्पतां ँयज्ञेन प्राणः प्राणो यज्ञेन कल्पताम् ।

15) 4.7.10.2(14)– प्राणः ।

प्राण इति प्र – अनः ।

16) 4.7.10.2(15)– यज्ञेन । कल्पताम् । अपानः । (GS –4.7–7)

यज्ञेन कल्पताम् कल्पतां ँयज्ञेन यज्ञेन कल्पता मपानो अपानः कल्पतां ँयज्ञेन यज्ञेन कल्पता मपानः ।

17) 4.7.10.2(16)– कल्पताम् । अपानः । यज्ञेन । (GS –4.7–7)

कल्पता मपानो अपानः कल्पताम् कल्पता मपानो यज्ञेन यज्ञेनापानः कल्पताम् कल्पता मपानो यज्ञेन ।

18) 4.7.10.2(17)- अपानः । यज्ञेन । कल्पताम् । (JM-74,JD-34,GD-30,GS -4.7-7)

अपानो यज्ञेन यज्ञेनापानो अपानो यज्ञेन कल्पताम् कल्पतां यँज्ञेनापानो अपानो यज्ञेन कल्पताम् ।

19) 4.7.10.2(17)- अपानः । (JM-74,JD-34,GD-30,GS -4.7-7)

अपान इत्यप - अनः ।

20) 4.7.10.2(18)- यज्ञेन । कल्पताम् । व्यानः । (GS -4.7-7)

यज्ञेन कल्पताम् कल्पतां यँज्ञेन यज्ञेन कल्पतां व्यँानो व्यानः कल्पतां यँज्ञेन यज्ञेन कल्पतां व्यँानः ।

21) 4.7.10.2(19)- कल्पताम् । व्यानः । यज्ञेन ।

कल्पतां व्यँानो व्यानः कल्पताम् कल्पतां व्यँानो यज्ञेन यज्ञेन व्यानः कल्पताम् कल्पतां व्यँानो यज्ञेन ।

22) 4.7.10.2(20)- व्यानः । यज्ञेन । कल्पताम् ।

व्यानो यज्ञेन यज्ञेन व्यानो व्यानो यज्ञेन कल्पताम् कल्पतां यँज्ञेन व्यानो व्यानो यज्ञेन कल्पताम् ।

23) 4.7.10.2(20)- व्यानः ।

व्यान इति वि - अनः ।

24) 4.7.10.2(21)- यज्ञेन । कल्पताम् । चक्षुः ।

यज्ञेन कल्पताम् कल्पतां यँज्ञेन यज्ञेन कल्पताम् चक्षु श्चक्षुः कल्पतां यँज्ञेन यज्ञेन कल्पताम् चक्षुः ।

25) 4.7.10.2(22)– कल्पताम् । चक्षुः । यज्ञेन ।

कल्पताम् चक्षु श्चक्षुः कल्पताम् कल्पताम् चक्षुर् यज्ञेन यज्ञेन चक्षुः कल्पताम् कल्पताम् चक्षुर् यज्ञेन ।

26) 4.7.10.2(23)– चक्षुः । यज्ञेन । कल्पताम् ।

चक्षुर् यज्ञेन यज्ञेन चक्षु श्चक्षुर् यज्ञेन कल्पताम् कल्पतां ँयज्ञेन चक्षु श्चक्षुर् यज्ञेन कल्पताम् ।

27) 4.7.10.2(24)– यज्ञेन । कल्पताम् । श्रोत्रम् ।

यज्ञेन कल्पताम् कल्पतां ँयज्ञेन यज्ञेन कल्पता(गग्) श्रोत्र(गग्) श्रोत्रम् कल्पतां ँयज्ञेन यज्ञेन कल्पता(गग्) श्रोत्रम् ।

28) 4.7.10.2(25)– कल्पताम् । श्रोत्रम् । यज्ञेन ।

कल्पता(गग्) श्रोत्र(गग्) श्रोत्रम् कल्पताम् कल्पता(गग्) श्रोत्रं ँयज्ञेन यज्ञेन श्रोत्रम् कल्पताम् कल्पता(गग्) श्रोत्रं ँयज्ञेन ।

29) 4.7.10.2(26)– श्रोत्रम् । यज्ञेन । कल्पताम् ।

श्रोत्रं ँयज्ञेन यज्ञेन श्रोत्र(गग्) श्रोत्रं ँयज्ञेन कल्पताम् कल्पतां ँयज्ञेन श्रोत्र(गग्) श्रोत्रं ँयज्ञेन कल्पताम् ।

30) 4.7.10.2(27)– यज्ञेन । कल्पताम् । मनः ।

यज्ञेन कल्पताम् कल्पतां ँयज्ञेन यज्ञेन कल्पताम् मनो मनः कल्पतां ँयज्ञेन यज्ञेन कल्पताम् मनः ।

31) 4.7.10.2(28)– कल्पताम् । मनः । यज्ञेन ।

कल्पताम् मनो मनः कल्पताम् कल्पताम् मनो यज्ञेन यज्ञेन मनः कल्पताम् कल्पताम् मनो यज्ञेन ।

32) 4.7.10.2(29)- मनः । यज्ञेन । कल्पताम् ।

मनो यज्ञेन यज्ञेन मनो मनो यज्ञेन कल्पताम् कल्पतां ँयज्ञेन मनो मनो यज्ञेन कल्पताम् ।

33) 4.7.10.2(30)- यज्ञेन । कल्पताम् । वाक् ।

यज्ञेन कल्पताम् कल्पतां ँयज्ञेन यज्ञेन कल्पतां ँवाग् वाक् कल्पतां ँयज्ञेन यज्ञेन कल्पतां ँवाक् ।

34) 4.7.10.2(31)- कल्पताम् । वाक् । यज्ञेन ।

कल्पतां ँवाग् वाक् कल्पताम् कल्पतां ँवाग् यज्ञेन यज्ञेन वाक् कल्पताम् कल्पतां ँवाग् यज्ञेन ।

35) 4.7.10.2(32)- वाक् । यज्ञेन । कल्पताम् ।

वाग् यज्ञेन यज्ञेन वाग् वाग् यज्ञेन कल्पताम् कल्पतां ँयज्ञेन वाग् वाग् यज्ञेन कल्पताम् ।

36) 4.7.10.2(33)- यज्ञेन । कल्पताम् । आत्मा ।

यज्ञेन कल्पताम् कल्पतां ँयज्ञेन यज्ञेन कल्पता मात्मा ऽऽत्मा कल्पतां ँयज्ञेन यज्ञेन कल्पता मात्मा ।

37) 4.7.10.2(34)- कल्पताम् । आत्मा । यज्ञेन ।

कल्पता मात्मा ऽऽत्मा कल्पताम् कल्पता मात्मा यज्ञेन यज्ञेनात्मा कल्पताम् कल्पता मात्मा यज्ञेन ।

38) 4.7.10.2(35)- आत्मा । यज्ञेन । कल्पताम् ।

आत्मा यज्ञेन यज्ञेनात्मा ऽऽत्मा यज्ञेन कल्पताम् कल्पतां ँयज्ञेनात्मा ऽऽत्मा यज्ञेन कल्पताम् ।

39) 4.7.10.2(36)- य॒ज्ञेन॑ । क॒ल्प॒ता॒म् । य॒ज्ञः ।

य॒ज्ञेन॑ कल्पताम् कल्पताꣳ य॒ज्ञेन॑ य॒ज्ञेन॑ कल्पताꣳ य॒ज्ञो य॒ज्ञः क॑ल्पताꣳ य॒ज्ञेन॑ य॒ज्ञेन॑ कल्पताꣳ य॒ज्ञः ।

40) 4.7.10.2(37)- क॒ल्प॒ता॒म् । य॒ज्ञः । य॒ज्ञेन॑ ।

क॒ल्प॒ता॒ꣳ य॒ज्ञो य॒ज्ञः क॑ल्पताम् कल्पताꣳ य॒ज्ञो य॒ज्ञेन॑ य॒ज्ञेन॑ य॒ज्ञः क॑ल्पताम् कल्पताꣳ य॒ज्ञो य॒ज्ञेन॑ ।

41) 4.7.10.2(38)- य॒ज्ञः । य॒ज्ञेन॑ । क॒ल्प॒ता॒म् ॥

य॒ज्ञो य॒ज्ञेन॑ य॒ज्ञेन॑ य॒ज्ञो य॒ज्ञो य॒ज्ञेन॑ कल्पताम् कल्पताꣳ य॒ज्ञेन॑ य॒ज्ञो य॒ज्ञो य॒ज्ञेन॑ कल्पताम् ।

42) 4.7.10.2(39)- य॒ज्ञेन॑ । क॒ल्प॒ता॒म् ॥

य॒ज्ञेन॑ कल्पताम् कल्पताꣳ य॒ज्ञेन॑ य॒ज्ञेन॑ कल्पताम् ।

43) 4.7.10.2(40)- क॒ल्प॒ता॒म् ॥

क॒ल्प॒ता॒मिति॑ कल्पताम् ।

========

## 4.7.11 अनुवाकम् 11 – घनम्

1) 4.7.11.1(1)– एका᳚ । च॒ । मे॒ ।

एका॑ च॒ चैकैका॑ च मे मे॒ चैकैका॑ च मे ।

2) 4.7.11.1(2)– च॒ । मे॒ । ति॒स्रः ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ ति॒स्र स्ति॒स्रो मे॑ च च मे ति॒स्रः ।

3) 4.7.11.1(3)– मे॒ । ति॒स्रः । च॒ ।

मे॒ ति॒स्र स्ति॒स्रो मे॑ मे ति॒स्रश्च॑ च ति॒स्रो मे॑ मे ति॒स्रश्च॑ ।

4) 4.7.11.1(4)– ति॒स्रः । च॒ । मे॒ ।

ति॒स्रश्च॑ च ति॒स्र स्ति॒स्रश्च॑ मे मे च ति॒स्र स्ति॒स्रश्च॑ मे ।

5) 4.7.11.1(5)– च॒ । मे॒ । पञ्च॑ ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ पञ्च॒ पञ्च॑ मे च च मे॒ पञ्च॑ ।

6) 4.7.11.1(6)– मे॒ । पञ्च॑ । च॒ ।

मे॒ पञ्च॒ पञ्च॑ मे मे॒ पञ्च॑ च च॒ पञ्च॑ मे मे॒ पञ्च॑ च ।

7) 4.7.11.1(7)– पञ्च॑ । च॒ । मे॒ ।

पञ्च॑ च च॒ पञ्च॒ पञ्च॑ च मे मे च॒ पञ्च॒ पञ्च॑ च मे ।

8) 4.7.11.1(8)– च॒ । मे॒ । स॒प्त ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ स॒प्त स॒प्त मे॑ च च मे स॒प्त ।

9) 4.7.11.1(9)– मे॒ । स॒प्त । च॒ ।

मे॒ स॒प्त स॒प्त मे॑ मे स॒प्त च॑ च स॒प्त मे॑ मे स॒प्त च॑ ।

10) 4.7.11.1(10)– स॒प्त । च॒ । मे॒ ।

स॒प्त च॑ च स॒प्त स॒प्त च॑ मे मे च स॒प्त स॒प्त च॑ मे ।

11) 4.7.11.1(11)– च॒ । मे॒ । नव॑ ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ न॒व नव॑ मे च च मे॒ नव॑ ।

12) 4.7.11.1(12)– मे॒ । नव॑ । च॒ ।

मे॒ न॒व नव॑ मे मे॒ नव॑ च च॒ नव॑ मे मे॒ नव॑ च ।

13) 4.7.11.1(13)– नव॑ । च॒ । मे॒ ।

नव॑ च च॒ न॒व नव॑ च मे मे च॒ न॒व नव॑ च मे ।

14) 4.7.11.1(14)– च॒ । मे॒ । एका॑दश ।

च॒ मे॒ मे॒ च॒ च॒ म॒ एका॑द॒ शैका॑दश मे च च म॒ एका॑दश ।

15) 4.7.11.1(15)– मे॒ । एका॑दश । च॒ ।

म॒ एका॑द॒ शैका॑दश मे म॒ एका॑दश च॒ चैका॑दश मे म॒ एका॑दश च ।

16) 4.7.11.1(16)– एका॑दश । च॒ । मे॒ ।

एका॑दश च॒ चैका॑द॒ शैका॑दश च मे मे॒ चैका॑द॒ शैका॑दश च मे ।

17) 4.7.11.1(17)– च॒ । मे॒ । त्रयो॑दश ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ त्रयो॑द॒श त्रयो॑दश मे च च मे॒ त्रयो॑दश ।

18) 4.7.11.1(18)– मे॒ । त्रयो॑दश । च॒ ।

मे॒ त्रयो॑द॒श त्रयो॑दश मे मे॒ त्रयो॑दश च च॒ त्रयो॑दश मे मे॒ त्रयो॑दश च ।

19) 4.7.11.1(19)– त्रयो॑दश । च॒ । मे॒ ।

त्रयो॑दश च च॒ त्रयो॑द॒श त्रयो॑दश च मे मे च॒ त्रयो॑द॒श त्रयो॑दश च मे ।

20) 4.7.11.1(19)- त्रयो॑दश ।

त्रयो॑द॒शेति॒ त्रय॑: - द॒श॒ ।

21) 4.7.11.1(20)- च॒ । मे॒ । प॒ञ्च॑दश ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ प॒ञ्च॑द॒श प॒ञ्च॑दश मे च च मे॒ प॒ञ्च॑दश ।

22) 4.7.11.1(21)- मे॒ । प॒ञ्च॑दश । च॒ ।

मे॒ प॒ञ्च॑द॒श प॒ञ्च॑दश मे मे॒ प॒ञ्च॑दश च च॒ प॒ञ्च॑दश मे मे॒ प॒ञ्च॑दश च ।

23) 4.7.11.1(22)- प॒ञ्च॑दश । च॒ । मे॒ ।

प॒ञ्च॑दश च च॒ प॒ञ्च॑द॒श प॒ञ्च॑दश च मे मे च॒ प॒ञ्च॑द॒श प॒ञ्च॑दश च मे ।

24) 4.7.11.1(22)- प॒ञ्च॑दश ।

प॒ञ्च॑द॒शेति॒ प॒ञ्च॑ - द॒श॒ ।

25) 4.7.11.1(23)- च॒ । मे॒ । स॒प्त॑दश ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ स॒प्त॑दश स॒प्त॑दश मे च च मे स॒प्त॑दश ।

26) 4.7.11.1(24)- मे॒ । स॒प्त॑दश । च॒ ।

मे॒ स॒प्त॑दश स॒प्त॑दश मे मे स॒प्त॑दश च च स॒प्त॑दश मे मे स॒प्त॑दश च ।

27) 4.7.11.1(25)- स॒प्त॑दश । च॒ । मे॒ ।

स॒प्त॑दश च च स॒प्त॑दश स॒प्त॑दश च मे मे च स॒प्त॑दश स॒प्त॑दश च मे ।

28) 4.7.11.1(25)- स॒प्त॑दश ।

स॒प्त॒द॑शेति स॒प्त - द॒श॒ ।

29) 4.7.11.1(26)- च॒ । मे॒ । नव॑दश ।

च॒ मे॒ मे॒ च॒ च॒ मे॒ नव॑द॒श नव॑दश मे च च मे॒ नव॑दश ।

30) 4.7.11.1(27)- मे । नवदश । च ।

मे नवदश नवदश मे मे नवदश च च नवदश मे मे नवदश च ।

31) 4.7.11.1(28)- नवदश । च । मे ।

नवदश च च नवदश नवदश च मे मे च नवदश नवदश च मे ।

32) 4.7.11.1(28)- नवदश ।

नवदशेति नव - दश ।

33) 4.7.11.1(29)- च । मे । एकवि(ग्म्)शतिः ।

च मे मे च च म एकवि(ग्म्)शति रेकवि(ग्म्)शतिर् मे च च म एकवि(ग्म्)शतिः ।

34) 4.7.11.1(30)- मे । एकवि(ग्म्)शतिः । च ।

म एकवि(ग्म्)शति रेकवि(ग्म्)शतिर् मे म एकवि(ग्म्)शतिश्च चैकवि(ग्म्)शतिर् मे म एकवि(ग्म्)शतिश्च ।

35) 4.7.11.1(31)- एकवि(ग्म्)शतिः । च । मे ।

एकवि(ग्म्)शतिश्च चैकवि(ग्म्)शति रेकवि(ग्म्)शतिश्च मे मे चैकवि(ग्म्)शति रेकवि(ग्म्)शतिश्च मे ।

36) 4.7.11.1(31)- एकवि(ग्म्)शतिः ।

एकवि(ग्म्)शतिरित्येक - वि(ग्म्)शतिः ।

37) 4.7.11.1(32)- च । मे । त्रयोवि(ग्म्)शतिः ।

च मे मे च च मे त्रयोवि(ग्म्)शति स्त्रयोवि(ग्म्)शतिर् मे च च मे त्रयोवि(ग्म्)शतिः ।

38) 4.7.11.1(33)- मे । त्रयोवि(ग्म्)शतिः । च ।

मे त्रयोवि(ग्म्)शति स्त्रयोवि(ग्म्)शतिर् मे मे त्रयोवि(ग्म्)शतिश्च च त्रयोवि(ग्म्)शतिर् मे मे त्रयोवि(ग्म्)शतिश्च ।

39) 4.7.11.1(34)- त्रयोवि(ग्म्)शतिः । च । मे ।

त्रयोवि(ग्म्)शतिश्च च त्रयोवि(ग्म्)शति स्त्रयोवि(ग्म्)शतिश्च मे मे च त्रयोवि(ग्म्)शति स्त्रयोवि(ग्म्)शतिश्च मे ।

40) 4.7.11.1(34)- त्रयोवि(ग्म्)शतिः ।

त्रयोवि(ग्म्)शतिरिति त्रयः - वि(ग्म्)शतिः ।

41) 4.7.11.1(35)- च । मे । पञ्चवि(ग्म्)शतिः ।

च मे मे च च मे पञ्चवि(ग्म्)शतिः पञ्चवि(ग्म्)शतिर् मे च च मे पञ्चवि(ग्म्)शतिः ।

42) 4.7.11.1(36)- मे । पञ्चवि(ग्म्)शतिः । च ।

मे पञ्चवि(ग्म्)शतिः पञ्चवि(ग्म्)शतिर् मे मे पञ्चवि(ग्म्)शतिश्च च पञ्चवि(ग्म्)शतिर् मे मे पञ्चवि(ग्म्)शतिश्च ।

43) 4.7.11.1(37)- पञ्चवि(ग्म्)शतिः । च । मे ।

पञ्चवि(ग्म्)शतिश्च च पञ्चवि(ग्म्)शतिः पञ्चवि(ग्म्)शतिश्च मे मे च पञ्चवि(ग्म्)शतिः पञ्चवि(ग्म्)शतिश्च मे ।

44) 4.7.11.1(37)- पञ्चवि(ग्म्)शतिः ।

पञ्चवि(ग्म्)शतिरिति पञ्च - वि(ग्म्)शतिः ।

45) 4.7.11.1(38)- च । मे । सप्तवि(ग्म्)शतिः ।

च मे मे च च मे सप्तवि(ग्म्)शतिः सप्तवि(ग्म्)शतिर् मे च च मे सप्तवि(ग्म्)शतिः ।

46) 4.7.11.1(39)- मे । सप्तवि(ग्म्)शतिः । च ।

मे सप्तवि(ग्म्)शतिः सप्तवि(ग्म्)शतिर् मे मे सप्तवि(ग्म्)शतिश्च च सप्तवि(ग्म्)शतिर् मे मे सप्तवि(ग्म्)शतिश्च ।

47) 4.7.11.1(40)- सप्तवि(ग्म्)शतिः । च । मे ।

सप्तवि(ग्म्)शतिश्च च सप्तवि(ग्म्)शतिः सप्तवि(ग्म्)शतिश्च मे मे च सप्तवि(ग्म्)शतिः सप्तवि(ग्म्)शतिश्च मे ।

48) 4.7.11.1(40)- सप्तवि(ग्म्)शतिः ।

सप्तवि(ग्म्)शतिरिति सप्त - वि(ग्म्)शतिः ।

49) 4.7.11.1(41)- च । मे । नववि(ग्म्)शतिः ।

च मे मे च च मे नववि(ग्म्)शतिर् नववि(ग्म्)शतिर् मे च च मे नववि(ग्म्)शतिः ।

50) 4.7.11.1(42)- मे । नववि(ग्म्)शतिः । च ।

मे नववि(ग्म्)शतिर् नववि(ग्म्)शतिर् मे मे नववि(ग्म्)शतिश्च च नववि(ग्म्)शतिर् मे मे नववि(ग्म्)शतिश्च ।

51) 4.7.11.1(43)- नववि(ग्म्)शतिः । च । मे ।

नववि(ग्म्)शतिश्च च नववि(ग्म्)शतिर् नववि(ग्म्)शतिश्च मे मे च नववि(ग्म्)शतिर् नववि(ग्म्)शतिश्च मे ।

52) 4.7.11.1(43)- नववि(ग्म्)शतिः ।

नववि(ग्म्)शतिरिति नव - वि(ग्म्)शतिः ।

53) 4.7.11.1(44)- च । मे । एकत्रि(ग्म्)शत् ।

च मे मे च च म एकत्रि(ग्म्)श देकत्रि(ग्म्)शन् मे च च म एकत्रि(ग्म्)शत् ।

54) 4.7.11.1(45)- मे । एकत्रि(ग्म्)शत् । च ।

म एकत्रि(ग्म्)श देकत्रि(ग्म्)शन् मे म एकत्रि(ग्म्)शच् च चैकत्रि(ग्म्)शन् मे म एकत्रि(ग्म्)शच् च ।

55) 4.7.11.1(46)- एकत्रि(ग्म्)शत् । च । मे ।

एकत्रि(ग्म्)शच् च चैकत्रि(ग्म्)श देकत्रि(ग्म्)शच् च मे मे चैकत्रि(ग्म्)श देकत्रि(ग्म्)शच् च मे ।

56) 4.7.11.1(46)- एकत्रि(ग्म्)शत् ।

एकत्रि(ग्म्)शदित्येक - त्रि(ग्म्)शत् ।

57) 4.7.11.1(47)- च । मे । त्रयस्त्रि(ग्म्)शत् ।

च मे मे च च मे त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शन् मे च च मे त्रयस्त्रि(ग्म्)शत् ।

58) 4.7.11.1(48)- मे । त्रयस्त्रि(ग्म्)शत् । च ।

मे त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शन् मे मे त्रयस्त्रि(ग्म्)शच् च च त्रयस्त्रि(ग्म्)शन् मे मे त्रयस्त्रि(ग्म्)शच् च ।

59) 4.7.11.1(49)- त्रयस्त्रि(ग्म्)शत् । च । मे ।

त्रयस्त्रि(ग्म्)शच् च च त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शच् च मे मे च त्रयस्त्रि(ग्म्)शत् त्रयस्त्रि(ग्म्)शच् च मे ।

60) 4.7.11.1(49)- त्रयस्त्रि(ग्म्)शत् ।

त्रयस्त्रि(ग्म्)शदिति त्रयः - त्रि(ग्म्)शत् ।

61) 4.7.11.1(50)- च । मे । चतस्रः ।

च मे मे च च मे चतस्र श्चतस्रो मे च च मे चतस्रः ।

1) 4.7.11.2(1)- मे । चतस्रः । च ।

मे चतस्र श्चतस्रो मे मे चतस्रश्च च चतस्रो मे मे चतस्रश्च ।

2) 4.7.11.2(2)- चतस्रः । च । मे ।

चतस्रश्च च चतस्र श्चतस्रश्च मे मे च चतस्र श्चतस्रश्च मे ।

3) 4.7.11.2(3)- च । मे । अष्टौ ।

च मे मे च च मे ऽष्टा वष्टौ मे च च मे ऽष्टौ ।

4) 4.7.11.2(4)- मे । अष्टौ । च ।

मे ऽष्टा वष्टौ मे मे ऽष्टौ च चाष्टौ मे मे ऽष्टौ च ।

5) 4.7.11.2(5)- अष्टौ । च । मे ।

अष्टौ च चाष्टा वष्टौ च मे मे चाष्टा वष्टौ च मे ।

6) 4.7.11.2(6)- च । मे । द्वादश ।

च मे मे च च मे द्वादश द्वादश मे च च मे द्वादश ।

7) 4.7.11.2(7)- मे । द्वादश । च ।

मे द्वादश द्वादश मे मे द्वादश च च द्वादश मे मे द्वादश च ।

8) 4.7.11.2(8)- द्वादश । च । मे ।

द्वादश च च द्वादश द्वादश च मे मे च द्वादश द्वादश च मे ।

9) 4.7.11.2(9)- च । मे । षोडश ।

च मे मे च च मे षोडश षोडश मे च च मे षोडश ।

10) 4.7.11.2(10)- मे । षोडश । च ।

मे षोडश षोडश मे मे षोडश च च षोडश मे मे षोडश च ।

11) 4.7.11.2(11)- षोडश । च । मे ।

षोडश च च षोडश षोडश च मे मे च षोडश षोडश च मे ।

12) 4.7.11.2(12)- च । मे । वि(ग्म्)शतिः ।

च मे मे च च मे वि(ग्म्)शतिर् वि(ग्म्)शतिर् मे च च मे वि(ग्म्)शतिः ।

13) 4.7.11.2(13)- मे । वि(ग्म्)शतिः । च ।

मे वि(ग्म्)शतिर् वि(ग्म्)शतिर् मे मे वि(ग्म्)शतिश्च च वि(ग्म्)शतिर् मे मे वि(ग्म्)शतिश्च ।

14) 4.7.11.2(14)- वि(ग्म्)शतिः । च । मे ।

वि(ग्म्)शतिश्च च वि(ग्म्)शतिर् वि(ग्म्)शतिश्च मे मे च वि(ग्म्)शतिर् वि(ग्म्)शतिश्च मे ।

15) 4.7.11.2(15)- च । मे । चतुर्वि(ग्म्)शतिः ।

च मे मे च च मे चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शतिर् मे च च मे चतुर्वि(ग्म्)शतिः ।

16) 4.7.11.2(16)- मे । चतुर्वि(ग्म्)शतिः । च ।

मे चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शतिर् मे मे चतुर्वि(ग्म्)शतिश्च च चतुर्वि(ग्म्)शतिर् मे मे चतुर्वि(ग्म्)शतिश्च ।

17) 4.7.11.2(17)- चतुर्वि(ग्म्)शतिः । च । मे ।

चतुर्वि(ग्म्)शतिश्च च चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शतिश्च मे मे च चतुर्वि(ग्म्)शति श्चतुर्वि(ग्म्)शतिश्च मे ।

18) 4.7.11.2(17)- चतुर्वि(ग्म्)शतिः ।

चतुर्वि(ग्म्)शतिरिति चतुः - वि(ग्म्)शतिः ।

19) 4.7.11.2(18)- च । मे । अष्टावि(ग्म्)शतिः ।

च मे मे च च मे ऽष्टावि(ग्म्)शति रष्टावि(ग्म्)शतिर् मे च च मे ऽष्टावि(ग्म्)शतिः ।

20) 4.7.11.2(19)- मे । अष्टावि(ग्म्)शतिः । च ।

मे ऽष्टावि(ग्म्)शति रष्टावि(ग्म्)शतिर् मे मे ऽष्टावि(ग्म्)शतिश्च चाष्टावि(ग्म्)शतिर् मे मे ऽष्टावि(ग्म्)शतिश्च ।

21) 4.7.11.2(20)- अष्टावि(ग्म्)शतिः । च । मे ।

अष्टावि(ग्म्)शतिश्च चाष्टावि(ग्म्)शति रष्टावि(ग्म्)शतिश्च मे मे चाष्टावि(ग्म्)शति रष्टावि(ग्म्)शतिश्च मे ।

22) 4.7.11.2(20)- अष्टावि(ग्म्)शतिः ।

अष्टावि(ग्म्)शतिरित्यष्टा - वि(ग्म्)शतिः ।

23) 4.7.11.2(21)- च । मे । द्वात्रि(ग्म्)शत् ।

च मे मे च च मे द्वात्रि(ग्म्)शद् द्वात्रि(ग्म्)शन् मे च च मे द्वात्रि(ग्म्)शत् ।

24) 4.7.11.2(22)- मे । द्वात्रि(ग्म्)शत् । च ।

मे द्वात्रि(ग्म्)शद् द्वात्रि(ग्म्)शन् मे मे द्वात्रि(ग्म्)शच् च च द्वात्रि(ग्म्)शन् मे मे द्वात्रि(ग्म्)शच् च ।

25) 4.7.11.2(23)- द्वात्रि(ग्म्)शत् । च । मे ।

द्वात्रि(ग्म्)शच् च च द्वात्रि(ग्म्)शद् द्वात्रि(ग्म्)शच् च मे मे च द्वात्रि(ग्म्)शद् द्वात्रि(ग्म्)शच् च मे ।

26) 4.7.11.2(24)- च । मे । षट्त्रि(ग्म्)शत् ।

च मे मे च च मे षट्त्रि(ग्म्)शथ् षट्त्रि(ग्म्)शन् मे च च मे षट्त्रि(ग्म्)शत् ।

27) 4.7.11.2(25)- मे । षट्त्रि(ग्म्)शत् । च ।

मे षट्त्रि(ग्म्)शथ् षट्त्रि(ग्म्)शन् मे मे षट्त्रि(ग्म्)शच् च च षट्त्रि(ग्म्)शन् मे मे षट्त्रि(ग्म्)शच् च ।

28) 4.7.11.2(26)- षट्त्रि(ग्म्)शत् । च । मे ।

षट्त्रि(ग्म्)शच् च च षट्त्रि(ग्म्)शथ् षट्त्रि(ग्म्)शच् च मे मे च षट्त्रि(ग्म्)शथ् षट्त्रि(ग्म्)शच् च मे ।

29) 4.7.11.2(26)- षट्त्रि(ग्म्)शत् ।

षट्त्रि(ग्म्)शदिति षट् - त्रि(ग्म्)शत् ।

30) 4.7.11.2(27)- च । मे । चत्वारि(ग्म्)शत् ।

च मे मे च च मे चत्वारि(ग्म्)शच् चत्वारि(ग्म्)शन् मे च च मे चत्वारि(ग्म्)शत् ।

31) 4.7.11.2(28)- मे । चत्वारि(ग्म्)शत् । च ।

मे चत्वारि(ग्म्)शच् चत्वारि(ग्म्)शन् मे मे चत्वारि(ग्म्)शच् च च चत्वारि(ग्म्)शन् मे मे चत्वारि(ग्म्)शच् च ।

32) 4.7.11.2(29)- चत्वारि(ग्म्)शत् । च । मे ।

चत्वारि(ग्म्)शच् च च चत्वारि(ग्म्)शच् चत्वारि(ग्म्)शच् च मे मे च चत्वारि(ग्म्)शच् चत्वारि(ग्म्)शच् च मे ।

33) 4.7.11.2(30)- च । मे । चतुश्चत्वारि(ग्म्)शत् ।

च मे मे च च मे चतुश्चत्वारि(ग्म्)शच् चतुश्चत्वारि(ग्म्)शन् मे च च मे चतुश्चत्वारि(ग्म्)शत् ।

34) 4.7.11.2(31)- मे । चतुश्चत्वारि(ग्म्)शत् । च ।

मे चतुश्चत्वारि(ग्म्)शच् चतुश्चत्वारि(ग्म्)शन् मे मे चतुश्चत्वारि(ग्म्)शच् च च चतुश्चत्वारि(ग्म्)शन् मे मे चतुश्चत्वारि(ग्म्)शच् च ।

35) 4.7.11.2(32)– चतुश्चत्वारि(ग्म्)शत् । च । मे ।

चतुश्चत्वारि(ग्म्)शच् च च चतुश्चत्वारि(ग्म्)शच् चतुश्चत्वारि(ग्म्)शच् च मे मे च चतुश्चत्वारि(ग्म्)शच् चतुश्चत्वारि(ग्म्)शच् च मे ।

36) 4.7.11.2(32)– चतुश्चत्वारि(ग्म्)शत् ।

चतुश्चत्वारि(ग्म्)शदिति चतुः – चत्वारि(ग्म्)शत् ।

37) 4.7.11.2(33)– च । मे । अष्टाचत्वारि(ग्म्)शत् ।

च मे मे च च मे ऽष्टाचत्वारि(ग्म्)श दष्टाचत्वारि(ग्म्)शन् मे च च मे ऽष्टाचत्वारि(ग्म्)शत् ।

38) 4.7.11.2(34)– मे । अष्टाचत्वारि(ग्म्)शत् । च ।

मे ऽष्टाचत्वारि(ग्म्)श दष्टाचत्वारि(ग्म्)शन् मे मे ऽष्टाचत्वारि(ग्म्)शच् च चाष्टाचत्वारि(ग्म्)शन् मे मे ऽष्टाचत्वारि(ग्म्)शच् च ।

39) 4.7.11.2(35)– अष्टाचत्वारि(ग्म्)शत् । च । मे ।

अष्टाचत्वारि(ग्म्)शच् च चाष्टाचत्वारि(ग्म्)श दष्टाचत्वारि(ग्म्)शच् च मे मे चाष्टाचत्वारि(ग्म्)श दष्टाचत्वारि(ग्म्)शच् च मे ।

40) 4.7.11.2(35)– अष्टाचत्वारि(ग्म्)शत् ।

अष्टाचत्वारि(ग्म्)शदित्यष्टा – चत्वारि(ग्म्)शत् ।

41) 4.7.11.2(36)– च । मे । वाजः ।

च मे मे च च मे वाजो वाजो मे च च मे वाजः ।

42) 4.7.11.2(37)– मे । वाजः । च ।

मे वाजो वाजो मे मे वाजश्च च वाजो मे मे वाजश्च ।

43) 4.7.11.2(38)– वाजः । च । प्रसवः ।

वाजश्च च वाजो वाजश्च प्रसवः प्रसवश्च वाजो वाजश्च प्रसवः ।

44) 4.7.11.2(39)- च । प्रसवः । च ।

च प्रसवः प्रसवश्च च प्रसवश्च च प्रसवश्च च प्रसवश्च ।

45) 4.7.11.2(40)- प्रसवः । च । अपिजः । (GS -4.7-8)

प्रसवश्च च प्रसवः प्रसव श्चापिजो अपिजश्च प्रसवः प्रसव श्चापिजः ।

46) 4.7.11.2(40)- प्रसवः । (GS -4.7-8)

प्रसव इति प्र - सवः ।

47) 4.7.11.2(41)- च । अपिजः । च । (GS -4.7-8)

चापिजो अपिजश्च चापिजश्च चापिजश्च चापिजश्च ।

48) 4.7.11.2(42)- अपिजः । च । क्रतुः । (JM-74,JD-34,GD-30,GS -4.7-8)

अपिजश्च चापिजो अपिजश्च क्रतुः क्रतु श्चापिजो अपिजश्च क्रतुः ।

49) 4.7.11.2(42)- अपिजः । (JM-74,JD-34,GD-30,GS -4.7-8)

अपिज इत्यपि - जः ।

50) 4.7.11.2(43)- च । क्रतुः । च । (GS -4.7-8)

च क्रतुः क्रतुश्च च क्रतुश्च च क्रतुश्च च क्रतुश्च ।

51) 4.7.11.2(44)- क्रतुः । च । सुवः । (GS -4.7-8)

क्रतुश्च च क्रतुः क्रतुश्च सुवः सुवश्च क्रतुः क्रतुश्च सुवः ।

52) 4.7.11.2(45)- च । सुवः । च । (GS -4.7-8)

च सुवः सुवश्च च सुवश्च च सुवश्च च सुवश्च ।

53) 4.7.11.2(46)- सुवः । च । मूर्द्धा ।

सुवश्च च सुवः सुवश्च मूर्द्धा मूर्द्धा च सुवः सुवश्च मूर्द्धा ।

54) 4.7.11.2(47)- च । मूर्द्धा । च ।

च मूर्द्धा मूर्द्धा च च मूर्द्धा च च मूर्द्धा च च मूर्द्धा च ।

55) 4.7.11.2(48)- मूर्द्धा । च । व्यश्ञियः ।

मूर्द्धा च च मूर्द्धा मूर्द्धा च व्यश्ञियो व्यश्ञियश्च मूर्द्धा मूर्द्धा च व्यश्ञियः ।

56) 4.7.11.2(49)- च । व्यश्ञियः । च ।

च व्यश्ञियो व्यश्ञियश्च च व्यश्ञियश्च च व्यश्ञियश्च च व्यश्ञियश्च ।

57) 4.7.11.2(50)- व्यश्ञियः । च । आन्त्यायनः ।

व्यश्ञियश्च च व्यश्ञियो व्यश्ञिय श्चान्त्यायन आन्त्यायनश्च व्यश्ञियो व्यश्ञिय श्चान्त्यायनः ।

58) 4.7.11.2(50)- व्यश्ञियः ।

व्यश्ञिय इति वि - अश्ञियः ।

59) 4.7.11.2(51)- च । आन्त्यायनः । च ।

चान्त्यायन आन्त्यायनश्च चान्त्यायनश्च चान्त्यायनश्च चान्त्यायनश्च ।

60) 4.7.11.2(52)- आन्त्यायनः । च । अन्त्यः । (GS -4.7-9)

आन्त्यायनश्च चान्त्यायन आन्त्यायन श्चान्त्यो अन्त्य श्चान्त्यायन आन्त्यायन श्चान्त्यः ।

61) 4.7.11.2(53)- च । अन्त्यः । च । (GS -4.7-9)

चान्त्यो अन्त्यश्च चान्त्यश्च चान्त्यश्च चान्त्यश्च ।

62) 4.7.11.2(54)- अन्त्यः । च । भौवनः । (GS -4.7-9)

अन्त्यश्च चान्त्यो अन्त्यश्च भौवनो भौवन श्चान्त्यो अन्त्यश्च भौवनः ।

63) 4.7.11.2(55)- च । भौवनः । च । (GS -4.7-9)

च भौवनो भौवनश्च च भौवनश्च च भौवनश्च च भौवनश्च ।

64) 4.7.11.2(56)- भौवनः । च । भुवनः ।

भौवनश्च च भौवनो भौवनश्च भुवनो भुवनश्च भौवनो भौवनश्च भुवनः ।

65) 4.7.11.2(57)- च । भुवनः । च ।

च भुवनो भुवनश्च च भुवनश्च च भुवनश्च च भुवनश्च ।

66) 4.7.11.2(58)- भुवनः । च । अधिपतिः ।

भुवनश्च च भुवनो भुवन श्चाधिपति रधिपतिश्च भुवनो भुवन श्चाधिपतिः ।

67) 4.7.11.2(59)- च । अधिपतिः । च ॥

चाधिपति रधिपतिश्च चाधिपतिश्च चाधिपतिश्च चाधिपतिश्च ।

68) 4.7.11.2(60)- अधिपतिः । च ॥

अधिपतिश्च चाधिपति रधिपतिश्च ।

69) 4.7.11.2(60)- अधिपतिः ।

अधिपतिरित्यधि - पतिः ।

70) 4.7.11.2(61)- च ॥

चेति च ।

==========

## 4.7.12 अनुवाकम् 12 – घनम्

1) 4.7.12.1(1)– वाजः । नः । सप्त । (GS –4.7–10)

वाजो नो नो वाजो वाजो नः सप्त सप्त नो वाजो वाजो नः सप्त ।

2) 4.7.12.1(2)– नः । सप्त । प्रदिशः । (GS –4.7–10)

नः सप्त सप्त नो नः सप्त प्रदिशः प्रदिशः सप्त नो नः सप्त प्रदिशः ।

3) 4.7.12.1(3)– सप्त । प्रदिशः । चतस्रः । (GS –4.7–10)

सप्त प्रदिशः प्रदिशः सप्त सप्त प्रदिश श्चतस्र श्चतस्रः प्रदिशः सप्त सप्त प्रदिश श्चतस्रः ।

4) 4.7.12.1(4)– प्रदिशः । चतस्रः । वा ।

प्रदिश श्चतस्र श्चतस्रः प्रदिशः प्रदिश श्चतस्रो वा वा चतस्रः प्रदिशः प्रदिश श्चतस्रो वा ।

5) 4.7.12.1(4)– प्रदिशः ।

प्रदिश इति प्र – दिशः ।

6) 4.7.12.1(5)– चतस्रः । वा । परावतः ॥

चतस्रो वा वा चतस्र श्चतस्रो वा परावतः परावतो वा चतस्र श्चतस्रो वा परावतः ।

7) 4.7.12.1(6)– वा । परावतः ॥

वा परावतः परावतो वा वा परावतः ।

8) 4.7.12.1(7)– परावतः ॥

परावत इति परा – वतः ।

9) 4.7.12.1(8)– वाजः । नः । विश्वैः ।

वाजो नो नो वाजो वाजो नो विश्वैर् विश्वैर् नो वाजो वाजो नो विश्वैः ।

10) 4.7.12.1(9)– नः । विश्वैः । देवैः ।

नो विश्वैर् विश्वैर् नो नो विश्वैर् देवैर् देवैर् विश्वैर् नो नो विश्वैर् देवैः ।

11) 4.7.12.1(10)- विश्वैः । देवैः । धनसातौ ।

विश्वैर् देवैर् देवैर् विश्वैर् विश्वैर् देवैर् धनसातौ धनसातौ देवैर् विश्वैर् विश्वैर् देवैर् धनसातौ ।

12) 4.7.12.1(11)- देवैः । धनसातौ । इह ।

देवैर् धनसातौ धनसातौ देवैर् देवैर् धनसाता विहेह धनसातौ देवैर् देवैर् धनसाता विह ।

13) 4.7.12.1(12)- धनसातौ । इह । अवतु ॥

धनसाता विहेह धनसातौ धनसाता विहाव त्वव त्विह धनसातौ धनसाता विहावतु ।

14) 4.7.12.1(12)- धनसातौ ।

धनसाताविति धन - सातौ ।

15) 4.7.12.1(13)- इह । अवतु ॥

इहाव त्ववत्वि हेहावतु ।

16) 4.7.12.1(14)- अवतु ॥

अवत्वित्यवतु ।

17) 4.7.12.1(15)- विश्वे । अद्य । मरुतः ।

विश्वे अद्याद्य विश्वे विश्वे अद्य मरुतो मरुतो अद्य विश्वे विश्वे अद्य मरुतः ।

18) 4.7.12.1(16)- अद्य । मरुतः । विश्वे ।

अद्य मरुतो मरुतो अद्याद्य मरुतो विश्वे विश्वे मरुतो अद्याद्य मरुतो विश्वे ।

19) 4.7.12.1(17)- मरुतः । विश्वे । ऊती ।

मरुतो विश्वे विश्वे मरुतो मरुतो विश्व ऊत् यूती विश्वे मरुतो मरुतो विश्व ऊती ।

20) 4.7.12.1(18)- विश्वे । ऊती । विश्वे ।

विश्व ऊत् यूती विश्वे विश्व ऊती विश्वे विश्व ऊती विश्वे विश्व ऊती विश्वे ।

21) 4.7.12.1(19)– ऊती । विश्वे । भवन्तु ।

ऊती विश्वे विश्व ऊत् यूती विश्वे भवन्तु भवन्तु विश्व ऊत् यूती विश्वे भवन्तु ।

22) 4.7.12.1(20)– विश्वे । भवन्तु । अग्नयः ।

विश्वे भवन्तु भवन्तु विश्वे विश्वे भवन् त्वग्नयो अग्नयो भवन्तु विश्वे विश्वे भवन् त्वग्नयः ।

23) 4.7.12.1(21)– भवन्तु । अग्नयः । समिद्धाः ॥

भवन् त्वग्नयो अग्नयो भवन्तु भवन् त्वग्नयः समिद्धाः समिद्धा अग्नयो भवन्तु भवन् त्वग्नयः समिद्धाः ।

24) 4.7.12.1(22)– अग्नयः । समिद्धाः ॥

अग्नयः समिद्धाः समिद्धा अग्नयो अग्नयः समिद्धाः ।

25) 4.7.12.1(23)– समिद्धाः ॥

समिद्धा इति सं – इद्धाः ।

26) 4.7.12.1(24)– विश्वे । नः । देवाः । (GS –4.7–11)

विश्वे नो नो विश्वे विश्वे नो देवा देवा नो विश्वे विश्वे नो देवाः ।

27) 4.7.12.1(25)– नः । देवाः । अवसा । (GS –4.7–11)

नो देवा देवा नो नो देवा अवसा ऽवसा देवा नो नो देवा अवसा ।

28) 4.7.12.1(26)– देवाः । अवसा । आ । (GS –4.7–11)

देवा अवसा ऽवसा देवा देवा अवसा ऽऽवसा देवा देवा अवसा ।

29) 4.7.12.1(27)– अवसा । आ । गमन्तु । (GS –4.7–11)

अवसा ऽऽवसा ऽवसा ऽऽगमन्तु गमन्त्वा ऽवसा ऽवसा ऽऽगमन्तु ।

30) 4.7.12.1(28)– आ । गमन्तु । विश्वम् । (GS –4.7–11)

आ गमन्तु गमन्त्वा गमन्तु विश्वं ँविश्वम् गमन्त्वा गमन्तु विश्वम् ।

31) 4.7.12.1(29)- गमन्तु । विश्वम् । अस्तु । (GS -4.7-11)

गमन्तु विश्वं ँविश्वम् गमन्तु गमन्तु विश्व मस्त्वस्तु विश्वम् गमन्तु गमन्तु विश्व मस्तु ।

32) 4.7.12.1(30)- विश्वम् । अस्तु । द्रविणम् ।

विश्व मस्त्वस्तु विश्वं ँविश्व मस्तु द्रविणम् द्रविण मस्तु विश्वं ँविश्व मस्तु द्रविणम् ।

33) 4.7.12.1(31)- अस्तु । द्रविणम् । वाजः ।

अस्तु द्रविणम् द्रविण मस्त्वस्तु द्रविणं ँवाजो वाजो द्रविण मस्त्वस्तु द्रविणं ँवाजः ।

34) 4.7.12.1(32)- द्रविणम् । वाजः । अस्मे ॥

द्रविणं ँवाजो वाजो द्रविणम् द्रविणं ँवाजो अस्मे अस्मे वाजो द्रविणम् द्रविणं ँवाजो अस्मे ।

35) 4.7.12.1(33)- वाजः । अस्मे ॥

वाजो अस्मे अस्मे वाजो वाजो अस्मे ।

36) 4.7.12.1(34)- अस्मे ॥

अस्मे इत्यस्मे ।

37) 4.7.12.1(35)- वाजस्य । प्रसवम् । देवाः ।

वाजस्य प्रसवम् प्रसवं ँवाजस्य वाजस्य प्रसवम् देवा देवाः प्रसवं ँवाजस्य वाजस्य प्रसवम् देवाः ।

38) 4.7.12.1(36)- प्रसवम् । देवाः । रथैः ।

प्रसवम् देवा देवाः प्रसवम् प्रसवम् देवा रथैर् रथैर् देवाः प्रसवम् प्रसवम् देवा रथैः ।

39) 4.7.12.1(36)- प्रसवम् ।

प्रसवमिति प्र - सवम् ।

40) 4.7.12.1(37)– देवाः । रथैः । यात ।

देवा रथैर् रथैर् देवा देवा रथैर् यात यात रथैर् देवा देवा रथैर् यात ।

41) 4.7.12.1(38)– रथैः । यात । हिरण्ययैः ॥

रथैर् यात यात रथैर् रथैर् याता हिरण्ययैर्. हिरण्ययैर् यात रथैर् रथैर् याता हिरण्ययैः ।

42) 4.7.12.1(39)– यात । हिरण्ययैः ॥

याता हिरण्ययैर्. हिरण्ययैर् यात याता हिरण्ययैः ।

43) 4.7.12.1(40)– हिरण्ययैः ॥

हिरण्ययैरिति हिरण्ययैः ।

44) 4.7.12.1(41)– अग्निः । इन्द्रः । बृहस्पतिः ।

अग्निरिन्द्र इन्द्रो अग्नि रग्नि रिन्द्रो बृहस्पतिर् बृहस्पति रिन्द्रो अग्नि रग्नि रिन्द्रो बृहस्पतिः ।

45) 4.7.12.1(42)– इन्द्रः । बृहस्पतिः । मरुतः ।

इन्द्रो बृहस्पतिर् बृहस्पति रिन्द्र इन्द्रो बृहस्पतिर् मरुतो मरुतो बृहस्पति रिन्द्र इन्द्रो बृहस्पतिर् मरुतः ।

46) 4.7.12.1(43)– बृहस्पतिः । मरुतः । सोमपीतये ॥

बृहस्पतिर् मरुतो मरुतो बृहस्पतिर् बृहस्पतिर् मरुतः सोमपीतये सोमपीतये मरुतो बृहस्पतिर् बृहस्पतिर् मरुतः सोमपीतये ।

47) 4.7.12.1(44)– मरुतः । सोमपीतये ॥

मरुतः सोमपीतये सोमपीतये मरुतो मरुतः सोमपीतये ।

48) 4.7.12.1(45)– सोमपीतये ॥

सोमपीतय इति सोम – पीतये ।

49) 4.7.12.1(46)– वाजेवाजे । अवत । वाजिनः ।

वाजेवाजे ऽवतावत वाजेवाजे वाजेवाजे ऽवत वाजिनो वाजिनो ऽवत वाजेवाजे वाजेवाजे ऽवत वाजिनः ।

50) 4.7.12.1(46)– वाजेवाजे ।

वाजेवाज इति वाजे – वाजे ।

51) 4.7.12.1(47)– अवत । वाजिनः । नः ।

अवत वाजिनो वाजिनो ऽवतावत वाजिनो नो नो वाजिनो ऽवतावत वाजिनो नः ।

52) 4.7.12.1(48)– वाजिनः । नः । धनेषु ।

वाजिनो नो नो वाजिनो वाजिनो नो धनेषु धनेषु नो वाजिनो वाजिनो नो धनेषु ।

53) 4.7.12.1(49)– नः । धनेषु । विप्राः ।

नो धनेषु धनेषु नो नो धनेषु विप्रा विप्रा धनेषु नो नो धनेषु विप्राः ।

54) 4.7.12.1(50)– धनेषु । विप्राः । अमृताः ।

धनेषु विप्रा विप्रा धनेषु धनेषु विप्रा अमृता अमृता विप्रा धनेषु धनेषु विप्रा अमृताः ।

1) 4.7.12.2(1)– विप्राः । अमृताः । ऋतज्ञाः ॥

विप्रा अमृता अमृता विप्रा विप्रा अमृता ऋतज्ञा ऋतज्ञा अमृता विप्रा विप्रा अमृता ऋतज्ञाः ।

2) 4.7.12.2(2)– अमृताः । ऋतज्ञाः ॥

अमृता ऋतज्ञा ऋतज्ञा अमृता अमृता ऋतज्ञाः ।

3) 4.7.12.2(3)– ऋतज्ञाः ॥

ऋतज्ञा इत्यृत – ज्ञाः ।

4) 4.7.12.2(4)– अ॒स्य । मद्ध्वः॑ । पि॒ब॒त॒ ।

अ॒स्य मद्ध्वो॒ मद्ध्वो॑ अ॒स्यास्य मद्ध्वः॑ पिबत पिबत॒ मद्ध्वो॑ अ॒स्यास्य मद्ध्वः॑ पिबत ।

5) 4.7.12.2(5)– मद्ध्वः॑ । पि॒ब॒त॒ । मा॒दय॑द्ध्वम् ।

मद्ध्वः॑ पिबत पिबत॒ मद्ध्वो॒ मद्ध्वः॑ पिबत मा॒दय॑द्ध्वम् मा॒दय॑द्ध्वम् पिबत॒ मद्ध्वो॒ मद्ध्वः॑ पिबत मा॒दय॑द्ध्वम् ।

6) 4.7.12.2(6)– पि॒ब॒त॒ । मा॒दय॑द्ध्वम् । तृ॒प्ताः ।

पि॒ब॒त॒ मा॒दय॑द्ध्वम् मा॒दय॑द्ध्वम् पिबत पिबत मा॒दय॑द्ध्वम् तृ॒प्ता स्तृ॒प्ता मा॒दय॑द्ध्वम् पिबत पिबत मा॒दय॑द्ध्वम् तृ॒प्ताः ।

7) 4.7.12.2(7)– मा॒दय॑द्ध्वम् । तृ॒प्ताः । या॒त॒ ।

मा॒दय॑द्ध्वम् तृ॒प्ता स्तृ॒प्ता मा॒दय॑द्ध्वम् मा॒दय॑द्ध्वम् तृ॒प्ता या॑त यात तृ॒प्ता मा॒दय॑द्ध्वम् मा॒दय॑द्ध्वम् तृ॒प्ता या॑त ।

8) 4.7.12.2(8)– तृ॒प्ताः । या॒त॒ । प॒थिभिः॑ ।

तृ॒प्ता या॑त यात तृ॒प्ता स्तृ॒प्ता या॑त प॒थिभिः॑ प॒थिभि॑र् यात तृ॒प्ता स्तृ॒प्ता या॑त प॒थिभिः॑ ।

9) 4.7.12.2(9)– या॒त॒ । प॒थिभिः॑ । दे॒व॒यानैः᳚ ॥

या॒त॒ प॒थिभिः॑ प॒थिभि॑र् यात यात प॒थिभि॑र् दे॒व॒यानै᳚र् दे॒व॒यानैः᳚ प॒थिभि॑र् यात यात प॒थिभि॑र् दे॒व॒यानैः᳚ ।

10) 4.7.12.2(10)– प॒थिभिः॑ । दे॒व॒यानैः᳚ ॥

प॒थिभि॑र् दे॒व॒यानै᳚र् दे॒व॒यानैः᳚ प॒थिभिः॑ प॒थिभि॑र् दे॒व॒यानैः᳚ ।

11) 4.7.12.2(10)– प॒थिभिः॑ ।

प॒थिभि॒रिति॑ प॒थि – भिः॒ ।

12) 4.7.12.2(11)- देवयानैः ॥

देवयानैरिति देव - यानैः ।

13) 4.7.12.2(12)- वाजः । पुरस्तात् । उत ।

वाजः पुरस्तात् पुरस्ताद् वाजो वाजः पुरस्ता दुतोत पुरस्ताद् वाजो वाजः पुरस्ता दुत ।

14) 4.7.12.2(13)- पुरस्तात् । उत । मद्ध्यतः ।

पुरस्ता दुतोत पुरस्तात् पुरस्ता दुत मद्ध्यतो मद्ध्यत उत पुरस्तात् पुरस्ता दुत मद्ध्यतः ।

15) 4.7.12.2(14)- उत । मद्ध्यतः । नः ।

उत मद्ध्यतो मद्ध्यत उतोत मद्ध्यतो नो नो मद्ध्यत उतोत मद्ध्यतो नः ।

16) 4.7.12.2(15)- मद्ध्यतः । नः । वाजः ।

मद्ध्यतो नो नो मद्ध्यतो मद्ध्यतो नो वाजो वाजो नो मद्ध्यतो मद्ध्यतो नो वाजः ।

17) 4.7.12.2(16)- नः । वाजः । देवान् ।

नो वाजो वाजो नो नो वाजो देवान् देवान्. वाजो नो नो वाजो देवान् ।

18) 4.7.12.2(17)- वाजः । देवान् । ऋतुभिः ।

वाजो देवान् देवान्. वाजो वाजो देवा(ग्म्) ऋतुभिर्. ऋतुभिर् देवान्. वाजो वाजो देवा(ग्म्) ऋतुभिः ।

19) 4.7.12.2(18)- देवान् । ऋतुभिः । कल्पयाति ॥

देवान् ऋतुभिर्. ऋतुभिर् देवान् देवा(ग्म्) ऋतुभिः कल्पयाति कल्पया त्यृतुभिर् देवान् देवा(ग्म्) ऋतुभिः कल्पयाति ।

20) 4.7.12.2(19)- ऋतुभिः । कल्पयाति ॥

ऋतुभिः कल्पयाति कल्पया त्यृतुभिर्. ऋतुभिः कल्पयाति ।

21) 4.7.12.2(19)– ऋतुभिः ।

ऋतुभिरित्यृतु – भिः ।

22) 4.7.12.2(20)– कल्पयाति ॥

कल्पयातीति कल्पयाति ।

23) 4.7.12.2(21)– वाजस्य । हि । प्रसवः ।

वाजस्य हि हि वाजस्य वाजस्य हि प्रसवः प्रसवो हि वाजस्य वाजस्य हि प्रसवः ।

24) 4.7.12.2(22)– हि । प्रसवः । नन्नमीति ।

हि प्रसवः प्रसवो हि हि प्रसवो नन्नमीति नन्नमीति प्रसवो हि हि प्रसवो नन्नमीति ।

25) 4.7.12.2(23)– प्रसवः । नन्नमीति । विश्वाः ।

प्रसवो नन्नमीति नन्नमीति प्रसवः प्रसवो नन्नमीति विश्वा विश्वा नन्नमीति प्रसवः प्रसवो नन्नमीति विश्वाः ।

26) 4.7.12.2(23)– प्रसवः ।

प्रसव इति प्र – सवः ।

27) 4.7.12.2(24)– नन्नमीति । विश्वाः । आशाः ।

नन्नमीति विश्वा विश्वा नन्नमीति नन्नमीति विश्वा आशा आशा विश्वा नन्नमीति नन्नमीति विश्वा आशाः ।

28) 4.7.12.2(25)– विश्वाः । आशाः । वाजपतिः ।

विश्वा आशा आशा विश्वा विश्वा आशा वाजपतिर् वाजपति राशा विश्वा विश्वा आशा वाजपतिः ।

29) 4.7.12.2(26)- आशाः । वाजपतिः । भवेयम् ॥

आशा वाजपतिर् वाजपति राशा आशा वाजपतिर् भवेयम् भवेयं ँवाजपति राशा आशा वाजपतिर् भवेयम् ।

30) 4.7.12.2(27)- वाजपतिः । भवेयम् ॥

वाजपतिर् भवेयम् भवेयं ँवाजपतिर् वाजपतिर् भवेयम् ।

31) 4.7.12.2(27)- वाजपतिः ।

वाजपतिरिति वाज - पतिः ।

32) 4.7.12.2(28)- भवेयम् ॥

भवेयमिति भवेयम् ।

33) 4.7.12.2(29)- पयः । पृथिव्याम् । पयः ।

पयः पृथिव्याम् पृथिव्याम् पयः पयः पृथिव्याम् पयः पयः पृथिव्याम् पयः पयः पृथिव्याम् पयः ।

34) 4.7.12.2(30)- पृथिव्याम् । पयः । ओषधीषु ।

पृथिव्याम् पयः पयः पृथिव्याम् पृथिव्याम् पय ओषधी ष्वोषधीषु पयः पृथिव्याम् पृथिव्याम् पय ओषधीषु ।

35) 4.7.12.2(31)- पयः । ओषधीषु । पयः ।

पय ओषधी ष्वोषधीषु पयः पय ओषधीषु पयः पय ओषधीषु पयः पय ओषधीषु पयः ।

36) 4.7.12.2(32)- ओषधीषु । पयः । दिवि ।

ओषधीषु पयः पय ओषधी ष्वोषधीषु पयो दिवि दिवि पय ओषधी ष्वोषधीषु पयो दिवि ।

37)    4.7.12.2(33)– पयः । दिवि । अन्तरिक्षे ।

पयो दिवि दिवि पयः पयो दिव्यन्तरिक्षे अन्तरिक्षे दिवि पयः पयो दिव्यन्तरिक्षे ।

38)    4.7.12.2(34)– दिवि । अन्तरिक्षे । पयः ।

दिव्यन्तरिक्षे अन्तरिक्षे दिवि दिव्यन्तरिक्षे पयः पयो अन्तरिक्षे दिवि दिव्यन्तरिक्षे पयः ।

39)    4.7.12.2(35)– अन्तरिक्षे । पयः । धाम् ॥

अन्तरिक्षे पयः पयो अन्तरिक्षे अन्तरिक्षे पयो धाम् धाम् पयो अन्तरिक्षे अन्तरिक्षे पयो धाम् ।

40)    4.7.12.2(36)– पयः । धाम् ॥

पयो धाम् धाम् पयः पयो धाम् ।

41)    4.7.12.2(37)– धाम् ॥

धामिति धाम् ।

42)    4.7.12.2(38)– पयस्वतीः । प्रदिशः । सन्तु ।

पयस्वतीः प्रदिशः प्रदिशः पयस्वतीः पयस्वतीः प्रदिशः सन्तु सन्तु प्रदिशः पयस्वतीः पयस्वतीः प्रदिशः सन्तु ।

43)    4.7.12.2(39)– प्रदिशः । सन्तु । मह्यम् ॥

प्रदिशः सन्तु सन्तु प्रदिशः प्रदिशः सन्तु मह्यम् मह्य(ग्म्) सन्तु प्रदिशः प्रदिशः सन्तु मह्यम् ।

44)    4.7.12.2(39)– प्रदिशः ।

प्रदिश इति प्र – दिशः ।

45)    4.7.12.2(40)– सन्तु । मह्यम् ॥

सन्तु मह्यम् मह्य(ग्म्) सन्तु सन्तु मह्यम् ।

46) 4.7.12.2(41)- मह्यम् ॥

मह्यमिति मह्यम् ।

47) 4.7.12.2(42)- सम् । मा । सृजामि ।

सम् मा मा स(ग्म्) सम् मा सृजामि सृजामि मा स(ग्म्) सम् मा सृजामि ।

48) 4.7.12.2(43)- मा । सृजामि । पयसा ।

मा सृजामि सृजामि मा मा सृजामि पयसा पयसा सृजामि मा मा सृजामि पयसा ।

49) 4.7.12.2(44)- सृजामि । पयसा । घृतेन ।

सृजामि पयसा पयसा सृजामि सृजामि पयसा घृतेन घृतेन पयसा सृजामि सृजामि पयसा घृतेन ।

50) 4.7.12.2(45)- पयसा । घृतेन । सम् ।

पयसा घृतेन घृतेन पयसा पयसा घृतेन स(ग्म्) सम् घृतेन पयसा पयसा घृतेन सम् ।

51) 4.7.12.2(46)- घृतेन । सम् । मा ।

घृतेन स(ग्म्) सम् घृतेन घृतेन सम् मा मा सम् घृतेन घृतेन सम् मा ।

52) 4.7.12.2(47)- सम् । मा । सृजामि ।

सम् मा मा स(ग्म्) सम् मा सृजामि सृजामि मा स(ग्म्) सम् मा सृजामि ।

53) 4.7.12.2(48)- मा । सृजामि । अपः ।

मा सृजामि सृजामि मा मा सृजा म्यपो अपः सृजामि मा मा सृजाम्यपः ।

54) 4.7.12.2(49)- सृजामि । अपः । ओषधीभिः ॥

सृजा म्यपो अपः सृजामि सृजा म्यप ओषधीभि रोषधीभि रपः सृजामि सृजा म्यप ओषधीभिः ।

55) 4.7.12.2(50)– अपः । ओषधीभिः ॥

अप ओषधीभि रोषधीभि रपो अप ओषधीभिः ।

1) 4.7.12.3(1)– ओषधीभिः ॥

ओषधीभिरित्योषधि – भिः ।

2) 4.7.12.3(2)– सः । अहम् । वाजम् ।

सो ऽह मह(ग्म्) स सो ऽहं ँवाजं ँवाज मह(ग्म्) स सो ऽहं ँवाजम् ।

3) 4.7.12.3(3)– अहम् । वाजम् । सनेयम् ।

अहं ँवाजं ँवाज मह महं ँवाज(ग्म्) सनेय(ग्म्) सनेयं ँवाज मह महं ँवाज(ग्म्) सनेयम् ।

4) 4.7.12.3(4)– वाजम् । सनेयम् । अग्ने ॥

वाज(ग्म्) सनेय(ग्म्) सनेयं ँवाजं ँवाज(ग्म्) सनेय मग्ने अग्ने सनेयं ँवाजं ँवाज(ग्म्) सनेय मग्ने ।

5) 4.7.12.3(5)– सनेयम् । अग्ने ॥

सनेय मग्ने अग्ने सनेय(ग्म्) सनेय मग्ने ।

6) 4.7.12.3(6)– अग्ने ॥

अग्न इत्यग्ने ।

7) 4.7.12.3(7)– नक्तोषासा । समनसा । विरूपे ।

नक्तोषासा समनसा समनसा नक्तोषासा नक्तोषासा समनसा विरूपे विरूपे समनसा नक्तोषासा नक्तोषासा समनसा विरूपे ।

8) 4.7.12.3(8)– समनसा । विरूपे । धापयेते ।

समनसा विरूपे विरूपे समनसा समनसा विरूपे धापयेते धापयेते विरूपे समनसा समनसा विरूपे धापयेते ।

9) 4.7.12.3(8)- समनसा ।

समनसेति स - मनसा ।

10) 4.7.12.3(9)- विरूपे । धापयेते । शिशुम् ।

विरूपे धापयेते धापयेते विरूपे विरूपे धापयेते शिशु(ग्म्) शिशुम् धापयेते विरूपे विरूपे धापयेते शिशुम् ।

11) 4.7.12.3(9)- विरूपे ।

विरूपे इति वि - रूपे ।

12) 4.7.12.3(10)- धापयेते । शिशुम् । एकम् ।

धापयेते शिशु(ग्म्) शिशुम् धापयेते धापयेते शिशु मेक मेक(ग्म्) शिशुम् धापयेते धापयेते शिशु मेकम् ।

13) 4.7.12.3(10)- धापयेते ।

धापयेते इति धापयेते ।

14) 4.7.12.3(11)- शिशुम् । एकम् । समीची ॥

शिशु मेक मेक(ग्म्) शिशु(ग्म्) शिशु मेक(ग्म्) समीची समीची एक(ग्म्) शिशु(ग्म्) शिशु मेक(ग्म्) समीची ।

15) 4.7.12.3(12)- एकम् । समीची ॥

एक(ग्म्) समीची समीची एक मेक(ग्म्) समीची ।

16) 4.7.12.3(13)- समीची ॥

समीची इति समीची ।

17) 4.7.12.3(14)– द्यावा । क्षाम । रुक्मः ।

द्यावा क्षाम क्षाम द्यावा द्यावा क्षामा रुक्मो रुक्मः क्षाम द्यावा द्यावा क्षामा रुक्मः ।

18) 4.7.12.3(15)– क्षाम । रुक्मः । अन्तः । (GD 65)

क्षामा रुक्मो रुक्मः क्षाम क्षामा रुक्मो अन्त रन्ता रुक्मः क्षाम क्षामा रुक्मो अन्तः ।

19) 4.7.12.3(16)– रुक्मः । अन्तः । वि ।

रुक्मो अन्ता रन्ता रुक्मो रुक्मो अन्तर् वि व्यन्ता रुक्मो रुक्मो अन्तर् वि ।

20) 4.7.12.3(17)– अन्तः । वि । भाति ।

अन्तर् वि व्यन्त रन्तर् वि भाति भाति व्यन्त रन्तर् वि भाति ।

21) 4.7.12.3(18)– वि । भाति । देवाः ।

वि भाति भाति वि वि भाति देवा देवा भाति वि वि भाति देवाः ।

22) 4.7.12.3(19)– भाति । देवाः । अग्निम् ।

भाति देवा देवा भाति भाति देवा अग्नि मग्निम् देवा भाति भाति देवा अग्निम् ।

23) 4.7.12.3(20)– देवाः । अग्निम् । धारयन्न् ।

देवा अग्नि मग्निम् देवा देवा अग्निम् धारयन् धारयन् नग्निम् देवा देवा अग्निम् धारयन्न् ।

24) 4.7.12.3(21)– अग्निम् । धारयन्न् । द्रविणोदाः ॥

अग्निम् धारयन् धारयन् नग्नि मग्निम् धारयन् द्रविणोदा द्रविणोदा धारयन् नग्नि मग्निम् धारयन् द्रविणोदाः ।

25) 4.7.12.3(22)– धारयन्न् । द्रविणोदाः ॥

धारयन् द्रविणोदा द्रविणोदा धारयन् धारयन् द्रविणोदाः ।

26) 4.7.12.3(23)– द्रविणोदाः ॥

द्रविणोदा इति द्रविणः – दाः ।

27) 4.7.12.3(24)- समुद्रः । असि । नभस्वान् ।

समुद्रो ऽस्यसि समुद्रः समुद्रो ऽसि नभस्वान् नभस्वा नसि समुद्रः समुद्रो ऽसि नभस्वान् ।

28) 4.7.12.3(25)- असि । नभस्वान् । आर्द्रदानुः ।

असि नभस्वान् नभस्वा नस्यसि नभस्वा नार्द्रदानु रार्द्रदानुर् नभस्वा नस्यसि नभस्वा नार्द्रदानुः ।

29) 4.7.12.3(26)- नभस्वान् । आर्द्रदानुः । शंभूः ।

नभस्वा नार्द्रदानु रार्द्रदानुर् नभस्वान् नभस्वा नार्द्रदानुः शंभूः शंभू रार्द्रदानुर् नभस्वान् नभस्वा नार्द्रदानुः शंभूः ।

30) 4.7.12.3(27)- आर्द्रदानुः । शंभूः । मयोभूः ।

आर्द्रदानुः शंभूः शंभू रार्द्रदानु रार्द्रदानुः शंभूर् मयोभूर् मयोभूः शंभू रार्द्रदानु रार्द्रदानुः शंभूर् मयोभूः ।

31) 4.7.12.3(27)- आर्द्रदानुः ।

आर्द्रदानुरित्यार्द्र - दानुः ।

32) 4.7.12.3(28)- शंभूः । मयोभूः । अभि ।

शंभूर् मयोभूर् मयोभूः शंभूः शंभूर् मयोभू रभ्यभि मयोभूः शंभूः शंभूर् मयोभूरभि ।

33) 4.7.12.3(28)- शंभूः ।

शंभूरिति शं - भूः ।

34) 4.7.12.3(29)- मयोभूः । अभि । मा ।

मयोभू रभ्यभि मयोभूर् मयोभू रभि मा मा ऽभि मयोभूर् मयोभू रभि मा ।

35) 4.7.12.3(29)– मयोभूः ।

मयोभूरिति मयः – भूः ।

36) 4.7.12.3(30)– अभि । मा । वाहि ।

अभि मा मा ऽभ्यभि मा वाहि वाहि मा ऽभ्यभि मा वाहि ।

37) 4.7.12.3(31)– मा । वाहि । स्वाहा ।

मा वाहि वाहि मा मा वाहि स्वाहा स्वाहा वाहि मा मा वाहि स्वाहा ।

38) 4.7.12.3(32)– वाहि । स्वाहा । मारुतः ।

वाहि स्वाहा स्वाहा वाहि वाहि स्वाहा मारुतो मारुतः स्वाहा वाहि वाहि स्वाहा मारुतः ।

39) 4.7.12.3(33)– स्वाहा । मारुतः । असि ।

स्वाहा मारुतो मारुतः स्वाहा स्वाहा मारुतो ऽस्यसि मारुतः स्वाहा स्वाहा मारुतो ऽसि ।

40) 4.7.12.3(34)– मारुतः । असि । मरुताम् ।

मारुतो ऽस्यसि मारुतो मारुतो ऽसि मरुताम् मरुता मसि मारुतो मारुतो ऽसि मरुताम् ।

41) 4.7.12.3(35)– असि । मरुताम् । गणः ।

असि मरुताम् मरुता मस्यसि मरुताम् गणो गणो मरुता मस्यसि मरुताम् गणः ।

42) 4.7.12.3(36)– मरुताम् । गणः । शंभूः ।

मरुताम् गणो गणो मरुताम् मरुताम् गणः शंभूः शंभूर् गणो मरुताम् मरुताम् गणः शंभूः ।

43) 4.7.12.3(37)– गणः । शंभूः । मयोभूः ।

गणः शंभूः शंभूर् गणो गणः शंभूर् मयोभूर् मयोभूः शंभूर् गणो गणः शंभूर् मयोभूः ।

44) 4.7.12.3(38)– शंभूः । मयोभूः । अभि ।

शंभूर् मयोभूर् मयोभूः शंभूः शंभूर् मयोभू रभ्यभि मयोभूः शंभूः शंभूर् मयोभूरभि ।

45) 4.7.12.3(38)- शंभूः ।

शंभूरिति शं - भूः ।

46) 4.7.12.3(39)- मयोभूः । अभि । मा ।

मयोभू रभ्यभि मयोभूर् मयोभू रभि मा मा ऽभि मयोभूर् मयोभू रभि मा ।

47) 4.7.12.3(39)- मयोभूः ।

मयोभूरिति मयः - भूः ।

48) 4.7.12.3(40)- अभि । मा । वाहि ।

अभि मा मा ऽभ्यभि मा वाहि वाहि मा ऽभ्यभि मा वाहि ।

49) 4.7.12.3(41)- मा । वाहि । स्वाहा ।

मा वाहि वाहि मा मा वाहि स्वाहा स्वाहा वाहि मा मा वाहि स्वाहा ।

50) 4.7.12.3(42)- वाहि । स्वाहा । अवस्युः ।

वाहि स्वाहा स्वाहा वाहि वाहि स्वाहा ऽवस्यु रवस्युः स्वाहा वाहि वाहि स्वाहा ऽवस्युः ।

51) 4.7.12.3(43)- स्वाहा । अवस्युः । असि ।

स्वाहा ऽवस्यु रवस्युः स्वाहा स्वाहा ऽवस्यु रस्य स्यवस्युः स्वाहा स्वाहा ऽवस्युरसि ।

52) 4.7.12.3(44)- अवस्युः । असि । दुवस्वान् ।

अवस्यु रस्य स्यवस्यु रवस्यु रसि दुवस्वान् दुवस्वा नस्यवस्यु रवस्यु रसि दुवस्वान् ।

53) 4.7.12.3(45)- असि । दुवस्वान् । शंभूः ।

असि दुवस्वान् दुवस्वा नस्यसि दुवस्वा ञ्छंभूः शंभूर् दुवस्वा नस्यसि दुवस्वा ञ्छंभूः ।

54) 4.7.12.3(46)– दुवस्वान् । शंभूः । मयोभूः ।

दुवस्वा ञ्छंभूः शंभूर् दुवस्वान् दुवस्वा ञ्छंभूर् मयोभूर् मयोभूः शंभूर् दुवस्वान् दुवस्वा ञ्छंभूर् मयोभूः ।

55) 4.7.12.3(47)– शंभूः । मयोभूः । अभि ।

शंभूर् मयोभूर् मयोभूः शंभूः शंभूर् मयोभू रभ्यभि मयोभूः शंभूः शंभूर् मयोभूरभि ।

56) 4.7.12.3(47)– शंभूः ।

शंभूरिति शं – भूः ।

57) 4.7.12.3(48)– मयोभूः । अभि । मा ।

मयोभू रभ्यभि मयोभूर् मयोभू रभि मा मा ऽभि मयोभूर् मयोभू रभि मा ।

58) 4.7.12.3(48)– मयोभूः ।

मयोभूरिति मयः – भूः ।

59) 4.7.12.3(49)– अभि । मा । वाहि ।

अभि मा मा ऽभ्यभि मा वाहि वाहि मा ऽभ्यभि मा वाहि ।

60) 4.7.12.3(50)– मा । वाहि । स्वाहा ॥

मा वाहि वाहि मा मा वाहि स्वाहा स्वाहा वाहि मा मा वाहि स्वाहा ।

61) 4.7.12.3(51)– वाहि । स्वाहा ॥

वाहि स्वाहा स्वाहा वाहि वाहि स्वाहा ।

62) 4.7.12.3(52)– स्वाहा ॥

स्वाहेति स्वाहा ।

=========

## 4.7.13 अनुवाकम् 13 – घनम्

1) 4.7.13.1(1)– अग्निम् । युनज्मि । शवसा । (GS –4.7–12)

अग्निं ँयुनज्मि युनज् म्यग्नि मग्निं ँयुनज्मि शवसा शवसा युनज्म्यग्नि मग्निं ँयुनज्मि शवसा ।

2) 4.7.13.1(2)– युनज्मि । शवसा । घृतेन । (GS –4.7–12)

युनज्मि शवसा शवसा युनज्मि युनज्मि शवसा घृतेन घृतेन शवसा युनज्मि युनज्मि शवसा घृतेन ।

3) 4.7.13.1(3)– शवसा । घृतेन । दिव्यम् । (GS –4.7–12)

शवसा घृतेन घृतेन शवसा शवसा घृतेन दिव्यम् दिव्यम् घृतेन शवसा शवसा घृतेन दिव्यम् ।

4) 4.7.13.1(4)– घृतेन । दिव्यम् । सुपर्णम् ।

घृतेन दिव्यम् दिव्यम् घृतेन घृतेन दिव्य(ग्म्) सुपर्ण(ग्म्) सुपर्णम् दिव्यम् घृतेन घृतेन दिव्य(ग्म्) सुपर्णम् ।

5) 4.7.13.1(5)– दिव्यम् । सुपर्णम् । वयसा ।

दिव्य(ग्म्) सुपर्ण(ग्म्) सुपर्णम् दिव्यम् दिव्य(ग्म्) सुपर्णं ँवयसा वयसा सुपर्णम् दिव्यम् दिव्य(ग्म्) सुपर्णं ँवयसा ।

6) 4.7.13.1(6)– सुपर्णम् । वयसा । बृहन्तम् ॥

सुपर्णं ँवयसा वयसा सुपर्ण(ग्म्) सुपर्णं ँवयसा बृहन्तम् बृहन्तं ँवयसा सुपर्ण(ग्म्) सुपर्णं ँवयसा बृहन्तम् ।

7) 4.7.13.1(6)– सुपर्णम् ।

सुपर्णमिति सु – पर्णम् ।

8) 4.7.13.1(7)– वयसा । बृहन्तम् ॥

वयसा बृहन्तम् बृहन्तं ँवयसा वयसा बृहन्तम् ।

9) 4.7.13.1(8)– बृहन्तम् ॥

बृहन्तमिति बृहन्तम् ।

10) 4.7.13.1(9)– तेन । वयम् । पतेम ।

तेन वयं ँवयम् तेन तेन वयम् पतेम पतेम वयम् तेन तेन वयम् पतेम ।

11) 4.7.13.1(10)– वयम् । पतेम । ब्रद्ध्नस्य ।

वयम् पतेम पतेम वयं ँवयम् पतेम ब्रद्ध्नस्य ब्रद्ध्नस्य पतेम वयं ँवयम् पतेम ब्रद्ध्नस्य ।

12) 4.7.13.1(11)– पतेम । ब्रद्ध्नस्य । विष्टपम् ।

पतेम ब्रद्ध्नस्य ब्रद्ध्नस्य पतेम पतेम ब्रद्ध्नस्य विष्टपं ँविष्टपम् ब्रद्ध्नस्य पतेम पतेम ब्रद्ध्नस्य विष्टपम् ।

13) 4.7.13.1(12)– ब्रद्ध्नस्य । विष्टपम् । सुवः ।

ब्रद्ध्नस्य विष्टपं ँविष्टपम् ब्रद्ध्नस्य ब्रद्ध्नस्य विष्टप(ग्म्) सुवः सुवर् विष्टपम् ब्रद्ध्नस्य ब्रद्ध्नस्य विष्टप(ग्म्) सुवः ।

14) 4.7.13.1(13)– विष्टपम् । सुवः । रुहाणाः ।

विष्टप(ग्म्) सुवः सुवर् विष्टपं ँविष्टप(ग्म्) सुवो रुहाणा रुहाणाः सुवर् विष्टपं ँविष्टप(ग्म्) सुवो रुहाणाः ।

15) 4.7.13.1(14)– सुवः । रुहाणाः । अधि ।

सुवो रुहाणा रुहाणाः सुवः सुवो रुहाणा अध्यधि रुहाणाः सुवः सुवो रुहाणा अधि ।

16) 4.7.13.1(15)- रुहाणाः । अधि । नाके ।

रुहाणा अध्यधि रुहाणा रुहाणा अधि नाके नाके अधि रुहाणा रुहाणा अधि नाके ।

17) 4.7.13.1(16)- अधि । नाके । उत्तमे ॥

अधि नाके नाके अध्यधि नाक उत्तम उत्तमे नाके अध्यधि नाक उत्तमे ।

18) 4.7.13.1(17)- नाके । उत्तमे ॥

नाक उत्तम उत्तमे नाके नाक उत्तमे ।

19) 4.7.13.1(18)- उत्तमे ॥

उत्तम इत्युत् - तमे ।

20) 4.7.13.1(19)- इमौ । ते । पक्षौ । (GS -4.7-13)

इमौ ते त इमा विमौ ते पक्षौ पक्षौ त इमा विमौ ते पक्षौ ।

21) 4.7.13.1(20)- ते । पक्षौ । अजरौ । (GS -4.7-13)

ते पक्षौ पक्षौ ते ते पक्षा वजरा वजरौ पक्षौ ते ते पक्षा वजरौ ।

22) 4.7.13.1(21)- पक्षौ । अजरौ । पतत्रिणः । (GS -4.7-13)

पक्षा वजरा वजरौ पक्षौ पक्षा वजरौ पतत्रिणः पतत्रिणो अजरौ पक्षौ पक्षा वजरौ पतत्रिणः ।

23) 4.7.13.1(22)- अजरौ । पतत्रिणः । याभ्याम् । (GS -4.7-13)

अजरौ पतत्रिणः पतत्रिणो अजरा वजरौ पतत्रिणो याभ्यां ँयाभ्याम् पतत्रिणो अजरा वजरौ पतत्रिणो याभ्याम् ।

24) 4.7.13.1(23)- पतत्रिणः । याभ्याम् । रक्षा(ग्म्)सि । (GS -4.7-13)

पतत्रिणो याभ्यां ँयाभ्याम् पतत्रिणः पतत्रिणो याभ्या(ग्म्) रक्षा(ग्म्)सि रक्षा(ग्म्)सि याभ्याम् पतत्रिणः पतत्रिणो याभ्या(ग्म्) रक्षा(ग्म्)सि ।

25) 4.7.13.1(24)– याभ्याम् । रक्षा(ग्म्)सि । अपह(ग्म्)सि ।

याभ्या(ग्म्) रक्षा(ग्म्)सि रक्षा(ग्म्)सि याभ्यां ँयाभ्या(ग्म्) रक्षा(गग्) स्यपह(गग्) स्यपह(ग्म्)सि रक्षा(ग्म्)सि याभ्यां ँयाभ्या(ग्म्) रक्षा(गग्) स्यपह(ग्म्)सि ।

26) 4.7.13.1(25)– रक्षा(ग्म्)सि । अपह(ग्म्)सि । अग्ने ॥

रक्षा(गग्) स्यपह(गग्) स्यपह(ग्म्)सि रक्षा(ग्म्)सि रक्षा(गग्) स्यपह(गग्) स्यग्ने अग्ने अपह(ग्म्)सि रक्षा(ग्म्)सि रक्षा(गग्) स्यपह(गग्) स्यग्ने ।

27) 4.7.13.1(26)– अपह(ग्म्)सि । अग्ने ॥

अपह(गग्) स्यग्ने अग्ने अपह(गग्) स्यपह(गग्) स्यग्ने ।

28) 4.7.13.1(26)– अपह(ग्म्)सि ।

अपह(ग्म्)सीत्यप – ह(ग्म्)सि ।

29) 4.7.13.1(27)– अग्ने ॥

अग्न इत्यग्ने ।

30) 4.7.13.1(28)– ताभ्याम् । पतेम । सुकृताम् ।

ताभ्याम् पतेम पतेम ताभ्याम् ताभ्याम् पतेम सुकृता(ग्म्) सुकृताम् पतेम ताभ्याम् ताभ्याम् पतेम सुकृताम् ।

31) 4.7.13.1(29)– पतेम । सुकृताम् । उ ।

पतेम सुकृता(ग्म्) सुकृताम् पतेम पतेम सुकृता मु वु सुकृताम् पतेम पतेम सुकृता मु ।

32) 4.7.13.1(30)– सुकृताम् । उ । लोकम् ।

सुकृता मु वु सुकृता(ग्म्) सुकृता मु लोकम् ँलोक मु सुकृता(ग्म्) सुकृता मु लोकम् ।

33) 4.7.13.1(30)– सुकृताम् ।

सुकृतामिति सु – कृताम् ।

34) 4.7.13.1(31)- उ । लोकम् । यत्र ।

उ लोकम् ँल्लोक मु वु लोकं ँयत्र यत्र लोक मु वु लोकं ँयत्र ।

35) 4.7.13.1(32)- लोकम् । यत्र । ऋषयः ।

लोकं ँयत्र यत्र लोकम् ँल्लोकं ँयत्र र्.षय ऋषयो यत्र लोकम् ँल्लोकं ँयत्र र्.षयः ।

36) 4.7.13.1(33)- यत्र । ऋषयः । प्रथमजाः ।

यत्र र्.षय ऋषयो यत्र यत्र र्.षयः प्रथमजाः प्रथमजा ऋषयो यत्र यत्र र्.षयः प्रथमजाः ।

37) 4.7.13.1(34)- ऋषयः । प्रथमजाः । ये ।

ऋषयः प्रथमजाः प्रथमजा ऋषय ऋषयः प्रथमजा ये ये प्रथमजा ऋषय ऋषयः प्रथमजा ये ।

38) 4.7.13.1(35)- प्रथमजाः । ये । पुराणाः ॥

प्रथमजा ये ये प्रथमजाः प्रथमजा ये पुराणाः पुराणा ये प्रथमजाः प्रथमजा ये पुराणाः ।

39) 4.7.13.1(35)- प्रथमजाः ।

प्रथमजा इति प्रथम - जाः ।

40) 4.7.13.1(36)- ये । पुराणाः ॥

ये पुराणाः पुराणा ये ये पुराणाः ।

41) 4.7.13.1(37)- पुराणाः ॥

पुराणा इति पुराणाः ।

42) 4.7.13.1(38)- चित् । असि । समुद्रयोनिः ।

चिदस्यसि चिच् चिदसि समुद्रयोनिः समुद्रयोनि रसि चिच् चिदसि समुद्रयोनिः ।

43) 4.7.13.1(39)– असि । समुद्रयोनिः । इन्दुः ।

असि समुद्रयोनिः समुद्रयोनि रस्यसि समुद्रयोनि रिन्दु रिन्दुः समुद्रयोनि रस्यसि समुद्रयोनि रिन्दुः ।

44) 4.7.13.1(40)– समुद्रयोनिः । इन्दुः । दक्षः ।

समुद्रयोनि रिन्दु रिन्दुः समुद्रयोनिः समुद्रयोनि रिन्दुर् दक्षो दक्ष इन्दुः समुद्रयोनिः समुद्रयोनि रिन्दुर् दक्षः ।

45) 4.7.13.1(40)– समुद्रयोनिः ।

समुद्रयोनिरितिसमुद्र – योनिः ।

46) 4.7.13.1(41)– इन्दुः । दक्षः । श्येनः ।

इन्दुर् दक्षो दक्ष इन्दु रिन्दुर् दक्षः श्येनः श्येनो दक्ष इन्दु रिन्दुर् दक्षः श्येनः ।

47) 4.7.13.1(42)– दक्षः । श्येनः । ऋतावा ॥

दक्षः श्येनः श्येनो दक्षो दक्षः श्येन ऋताव र्तावा श्येनो दक्षो दक्षः श्येन ऋतावा ।

48) 4.7.13.1(43)– श्येनः । ऋतावा ॥

श्येन ऋताव र्तावा श्येनः श्येन ऋतावा ।

49) 4.7.13.1(44)– ऋतावा ॥

ऋतावेत्यृत – वा ।

50) 4.7.13.1(45)– हिरण्यपक्षः । शकुनः । भुरण्युः ।

हिरण्यपक्षः शकुनः शकुनो हिरण्यपक्षो हिरण्यपक्षः शकुनो भुरण्युर् भुरण्युः शकुनो हिरण्यपक्षो हिरण्यपक्षः शकुनो भुरण्युः ।

51) 4.7.13.1(45)– हिरण्यपक्षः ।

हिरण्यपक्ष इति हिरण्य – पक्षः ।

52) 4.7.13.1(46)- शकुनः । भुरण्युः । महान् ।

शकुनो भुरण्युर् भुरण्युः शकुनः शकुनो भुरण्युर् महान् महान् भुरण्युः शकुनः शकुनो भुरण्युर् महान् ।

53) 4.7.13.1(47)- भुरण्युः । महान् । सधस्थे ।

भुरण्युर् महान् महान् भुरण्युर् भुरण्युर् महान् थ्सधस्थे सधस्थे महान् भुरण्युर् भुरण्युर् महान् थ्सधस्थे ।

54) 4.7.13.1(48)- महान् । सधस्थे । ध्रुवः ।

महान् थ्सधस्थे सधस्थे महान् महान् थ्सधस्थे ध्रुवो ध्रुवः सधस्थे महान् महान् थ्सधस्थे ध्रुवः ।

55) 4.7.13.1(49)- सधस्थे । ध्रुवः । आ ।

सधस्थे ध्रुवो ध्रुवः सधस्थे सधस्थे ध्रुव आ ध्रुवः सधस्थे सधस्थे ध्रुव आ ।

56) 4.7.13.1(49)- सधस्थे ।

सधस्थ इति सध - स्थे ।

57) 4.7.13.1(50)- ध्रुवः । आ । निषत्तः ॥

ध्रुव आ ध्रुवो ध्रुव आ निषत्तो निषत्त आ ध्रुवो ध्रुव आ निषत्तः ।

1) 4.7.13.2(1)- आ । निषत्तः ॥

आ निषत्तो निषत्त आ निषत्तः ।

2) 4.7.13.2(2)- निषत्तः ॥

निषत्त इति नि - सत्तः ।

3) 4.7.13.2(3)- नमः । ते । अस्तु ।

नमस्ते ते नमो नमस्ते अस्त्वस्तु ते नमो नमस्ते अस्तु ।

4) 4.7.13.2(4)- ते । अस्तु । मा । (PS 11.17)

ते अस्त्वस्तु ते ते अस्तु मा मा ऽस्तु ते ते अस्तु मा ।

5) 4.7.13.2(5)- अस्तु । मा । मा । (PS 11.17)

अस्तु मा मा ऽस्त्वस्तु मा मा मा मा ऽस्त्वस्तु मा मा ।

6) 4.7.13.2(6)- मा । मा । हि(ग्म्)सीः ।

मा मा मा मा मा मा हि(ग्म्)सीर्. हि(ग्म्)सीर् मा मा मा मा हि(ग्म्)सीः ।

7) 4.7.13.2(7)- मा । हि(ग्म्)सीः । विश्वस्य ।

मा हि(ग्म्)सीर्. हि(ग्म्)सीर् मा मा हि(ग्म्)सीर् विश्वस्य विश्वस्य हि(ग्म्)सीर् मा मा हि(ग्म्)सीर् विश्वस्य ।

8) 4.7.13.2(8)- हि(ग्म्)सीः । विश्वस्य । मूर्द्धन्न् ।

हि(ग्म्)सीर् विश्वस्य विश्वस्य हि(ग्म्)सीर्. हि(ग्म्)सीर् विश्वस्य मूर्द्धन् मूर्द्धन्. विश्वस्य हि(ग्म्)सीर्. हि(ग्म्)सीर् विश्वस्य मूर्द्धन्न् ।

9) 4.7.13.2(9)- विश्वस्य । मूर्द्धन्न् । अधि ।

विश्वस्य मूर्द्धन् मूर्द्धन्. विश्वस्य विश्वस्य मूर्द्धन् नध्यधि मूर्द्धन्. विश्वस्य विश्वस्य मूर्द्धन् नधि ।

10) 4.7.13.2(10)- मूर्द्धन्न् । अधि । तिष्ठसि ।

मूर्द्धन् नध्यधि मूर्द्धन् मूर्द्धन् नधि तिष्ठसि तिष्ठस्यधि मूर्द्धन् मूर्द्धन् नधि तिष्ठसि ।

11) 4.7.13.2(11)- अधि । तिष्ठसि । श्रितः ॥

अधि तिष्ठसि तिष्ठ स्यध्यधि तिष्ठसि श्रितः श्रित स्तिष्ठ स्यध्यधि तिष्ठसि श्रितः ।

12) 4.7.13.2(12)- तिष्ठसि । श्रितः ॥

तिष्ठसि श्रितः श्रित स्तिष्ठसि तिष्ठसि श्रितः ।

13) 4.7.13.2(13)- श्रितः ॥

श्रित इति श्रितः ।

14) 4.7.13.2(14)- समुद्रे । ते । हृदयम् ।

समुद्रे ते ते समुद्रे समुद्रे ते हृदय(ग्म्) हृदयम् ते समुद्रे समुद्रे ते हृदयम् ।

15) 4.7.13.2(15)- ते । हृदयम् । अन्तः ।

ते हृदय(ग्म्) हृदयम् ते ते हृदय मन्तर् अन्तर्. हृदयम् ते ते हृदय मन्तः ।

16) 4.7.13.2(16)- हृदयम् । अन्तः । आयुः ।

हृदय मन्तर् अन्तर्. हृदय(ग्म्) हृदय मन्तर् आयु रायु रन्तर्. हृदय(ग्म्) हृदय मन्तर् आयुः ।

17) 4.7.13.2(17)- अन्तः । आयुः । द्यावापृथिवी ।

अन्त रायु रायु रन्तर् अन्त रायुर् द्यावापृथिवी द्यावापृथिवी आयुरन्त रन्तर् आयुर् द्यावापृथिवी ।

18) 4.7.13.2(18)- आयुः । द्यावापृथिवी । भुवनेषु ।

आयुर् द्यावापृथिवी द्यावापृथिवी आयु रायुर् द्यावापृथिवी भुवनेषु भुवनेषु द्यावापृथिवी आयु रायुर् द्यावापृथिवी भुवनेषु ।

19) 4.7.13.2(19)- द्यावापृथिवी । भुवनेषु । अर्पिते ॥

द्यावापृथिवी भुवनेषु भुवनेषु द्यावापृथिवी द्यावापृथिवी भुवने ष्वर्पिते अर्पिते भुवनेषु द्यावापृथिवी द्यावापृथिवी भुवने ष्वर्पिते ।

20) 4.7.13.2(19)– द्यावापृथिवी ।

द्यावापृथिवी इति द्यावा – पृथिवी ।

21) 4.7.13.2(20)– भुवनेषु । अर्पिते ॥

भुवने ष्वर्पिते अर्पिते भुवनेषु भुवने ष्वर्पिते ।

22) 4.7.13.2(21)– अर्पिते ॥

अर्पिते इत्यर्पिते ।

23) 4.7.13.2(22)– उद्नः । दत्त । उदधिम् ।

उद्नो दत्त दत्तोद्न उद्नो दत्तोदधि मुदधिम् दत्तोद्न उद्नो दत्तोदधिम् ।

24) 4.7.13.2(23)– दत्त । उदधिम् । भिन्त ।

दत्तोदधि मुदधिम् दत्त दत्तोदधिम् भिन्त भिन्तोदधिम् दत्त दत्तोदधिम् भिन्त ।

25) 4.7.13.2(24)– उदधिम् । भिन्त । दिवः ।

उदधिम् भिन्त भिन्तोदधि मुदधिम् भिन्त दिवो दिवो भिन्तोदधि मुदधिम् भिन्त दिवः ।

26) 4.7.13.2(24)– उदधिम् ।

उदधिमित्युद – धिम् ।

27) 4.7.13.2(25)– भिन्त । दिवः । पर्जन्यात् ।

भिन्त दिवो दिवो भिन्त भिन्त दिवः पर्जन्यात् पर्जन्याद् दिवो भिन्त भिन्त दिवः पर्जन्यात् ।

28) 4.7.13.2(26)– दिवः । पर्जन्यात् । अन्तरिक्षात् ।

दिवः पर्जन्यात् पर्जन्याद् दिवो दिवः पर्जन्या दन्तरिक्षा दन्तरिक्षात् पर्जन्याद् दिवो दिवः पर्जन्या दन्तरिक्षात् ।

29) 4.7.13.2(27)- पर्जन्यात् । अन्तरिक्षात् । पृथिव्याः ।

पर्जन्या दन्तरिक्षा दन्तरिक्षात् पर्जन्यात् पर्जन्या दन्तरिक्षात् पृथिव्याः पृथिव्या अन्तरिक्षात् पर्जन्यात् पर्जन्या दन्तरिक्षात् पृथिव्याः ।

30) 4.7.13.2(28)- अन्तरिक्षात् । पृथिव्याः । ततः ।

अन्तरिक्षात् पृथिव्याः पृथिव्या अन्तरिक्षा दन्तरिक्षात् पृथिव्या स्तत स्ततः पृथिव्या अन्तरिक्षा दन्तरिक्षात् पृथिव्या स्ततः ।

31) 4.7.13.2(29)- पृथिव्याः । ततः । नः ।

पृथिव्या स्तत स्ततः पृथिव्याः पृथिव्या स्ततो नो न स्ततः पृथिव्याः पृथिव्या स्ततो नः ।

32) 4.7.13.2(30)- ततः । नः । वृष्ट्या ।

ततो नो न स्तत स्ततो नो वृष्ट्या वृष्ट्या न स्तत स्ततो नो वृष्ट्या ।

33) 4.7.13.2(31)- नः । वृष्ट्या । अवत ॥

नो वृष्ट्या वृष्ट्या नो नो वृष्ट्या ऽवतावत वृष्ट्या नो नो वृष्ट्या ऽवत ।

34) 4.7.13.2(32)- वृष्ट्या । अवत ॥

वृष्ट्या ऽवता वत वृष्ट्या वृष्ट्या ऽवत ।

35) 4.7.13.2(33)- अवत ॥

अवतेत्यवत ।

36) 4.7.13.2(34)- दिवः । मूर्द्धा । असि ।

दिवो मूर्द्धा मूर्द्धा दिवो दिवो मूर्द्धा ऽस्यसि मूर्द्धा दिवो दिवो मूर्द्धा ऽसि ।

37) 4.7.13.2(35)- मूर्द्धा । असि । पृथिव्याः ।

मूर्द्धा ऽस्यसि मूर्द्धा मूर्द्धा ऽसि पृथिव्याः पृथिव्या असि मूर्द्धा मूर्द्धा ऽसि पृथिव्याः ।

38) 4.7.13.2(36)- असि । पृथिव्याः । नाभिः ।

असि पृथिव्याः पृथिव्या अस्यसि पृथिव्या नाभिर् नाभिः पृथिव्या अस्यसि पृथिव्या नाभिः ।

39) 4.7.13.2(37)- पृथिव्याः । नाभिः । ऊर्क् ।

पृथिव्या नाभिर् नाभिः पृथिव्याः पृथिव्या नाभि रूर् गूर्ङ् नाभिः पृथिव्याः पृथिव्या नाभि रूर्क् ।

40) 4.7.13.2(38)- नाभिः । ऊर्क् । अपाम् ।

नाभि रूर् गूर्ङ् नाभिर् नाभि रूर् गपा मपा मूर्ङ् नाभिर् नाभि रूर्गपाम् ।

41) 4.7.13.2(39)- ऊर्क् । अपाम् । ओषधीनाम् ॥

ऊर्गपा मपा मूर् गूर् गपा मोषधीना मोषधीना मपा मूर् गूर्गपा मोषधीनाम् ।

42) 4.7.13.2(40)- अपाम् । ओषधीनाम् ॥

अपा मोषधीना मोषधीना मपा मपा मोषधीनाम् ।

43) 4.7.13.2(41)- ओषधीनाम् ॥

ओषधीनामित्योषधीनाम् ।

44) 4.7.13.2(42)- विश्वायुः । शर्म । सप्रथाः ।

विश्वायुः शर्म शर्म विश्वायुर् विश्वायुः शर्म सप्रथाः सप्रथाः शर्म विश्वायुर् विश्वायुः शर्म सप्रथाः ।

45) 4.7.13.2(42)- विश्वायुः ।

विश्वायुरिति विश्व – आयुः ।

46) 4.7.13.2(43)- शर्म । सप्रथाः । नमः ।

शर्म सप्रथाः सप्रथाः शर्म शर्म सप्रथा नमो नमः सप्रथाः शर्म शर्म सप्रथा नमः ।

47) 4.7.13.2(44)- सप्रथाः । नमः । पथे ॥

सप्रथा नमो नमः सप्रथाः सप्रथा नम स्पथे पथे नमः सप्रथाः सप्रथा नम स्पथे ।

48) 4.7.13.2(44)- सप्रथाः ।

सप्रथा इति स - प्रथाः ।

49) 4.7.13.2(45)- नमः । पथे ॥

नम स्पथे पथे नमो नम स्पथे ।

50) 4.7.13.2(46)- पथे ॥

पथ इति पथे ।

51) 4.7.13.2(47)- येन । ऋषयः । तपसा ।

येन र्.षय ऋषयो येन येन र्.षय स्तपसा तपस र्.षयो येन येन र्.षय स्तपसा ।

52) 4.7.13.2(48)- ऋषयः । तपसा । सत्रम् ।

ऋषय स्तपसा तपस र्.षय ऋषय स्तपसा सत्र(ग्म्) सत्रम् तपस र्.षय ऋषय स्तपसा सत्रम् ।

53) 4.7.13.2(49)- तपसा । सत्रम् । आसत ।

तपसा सत्र(ग्म्) सत्रम् तपसा तपसा सत्र मासता सत सत्रम् तपसा तपसा सत्र मासत ।

54) 4.7.13.2(50)- सत्रम् । आसत । इन्धानाः ।

सत्र मासता सत सत्र(ग्म्) सत्र मासतेन्धाना इन्धाना आसत सत्र(ग्म्) सत्र मासतेन्धानाः ।

1) 4.7.13.3(1)- आसत । इन्धानाः । अग्निम् ।

आसतेन्धाना इन्धाना आसता सतेन्धाना अग्नि मग्नि मिन्धाना आसता सतेन्धाना अग्निम् ।

2) 4.7.13.3(2)– इन्धानाः । अग्निम् । सुवः ।

इन्धाना अग्नि मग्नि मिन्धाना इन्धाना अग्नि(ग्म्) सुवः सुव रग्नि मिन्धाना इन्धाना अग्नि(ग्म्) सुवः ।

3) 4.7.13.3(3)– अग्निम् । सुवः । आभरन्तः ॥

अग्नि(ग्म्) सुवः सुव रग्नि मग्नि(ग्म्) सुव राभरन्त आभरन्तः सुव रग्नि मग्नि(ग्म्) सुव राभरन्तः ।

4) 4.7.13.3(4)– सुवः । आभरन्तः ॥

सुव राभरन्त आभरन्तः सुवः सुव राभरन्तः ।

5) 4.7.13.3(5)– आभरन्तः ॥

आभरन्त इत्या – भरन्तः ।

6) 4.7.13.3(6)– तस्मिन्न् । अहम् । नि । (GS –4.7–14)

तस्मिन् नह महम् तस्मि(गग्) स्तस्मिन् नहम् नि न्यहम् तस्मि(गग्) स्तस्मिन् नहम् नि ।

7) 4.7.13.3(7)– अहम् । नि । दधे । (GS –4.7–14)

अहम् नि न्यह महम् नि दधे दधे न्यह महम् नि दधे ।

8) 4.7.13.3(8)– नि । दधे । नाके । (GS –4.7–14)

नि दधे दधे नि नि दधे नाके नाके दधे नि नि दधे नाके ।

9) 4.7.13.3(9)– दधे । नाके । अग्निम् । (GS –4.7–14)

दधे नाके नाके दधे दधे नाके अग्नि मग्निम् नाके दधे दधे नाके अग्निम् ।

10) 4.7.13.3(10)– नाके । अग्निम् । एतम् । (GS –4.7–14)

नाके अग्नि मग्निम् नाके नाके अग्नि मेत मेत मग्निम् नाके नाके अग्नि मेतम् ।

11) 4.7.13.3(11)- अ॒ग्निम् । ए॒तम् । यम् ।

अ॒ग्नि मे॒त मे॒त म॒ग्नि म॒ग्नि मे॒तं ँयं ँय मे॒त म॒ग्नि म॒ग्नि मे॒तं ँयम् ।

12) 4.7.13.3(12)- ए॒तम् । यम् । आ॒हुः ।

ए॒तं ँयं ँय मे॒त मे॒तं ँय मा॒हु रा॒हु॒र् य मे॒त मे॒तं ँय मा॒हुः ।

13) 4.7.13.3(13)- यम् । आ॒हुः । मन॑वः ।

य मा॒हु रा॒हु॒र् यं ँय मा॒हु॒र् मन॑वो॒ मन॑व आ॒हु॒र् यं ँय मा॒हु॒र् मन॑वः ।

14) 4.7.13.3(14)- आ॒हुः । मन॑वः । स्ती॒र्णब॑र्.हिषम् ॥

आ॒हु॒र् मन॑वो॒ मन॑व आ॒हु रा॒हु॒र् मन॑वः स्ती॒र्णब॑र्.हिष(गग्) स्ती॒र्णब॑र्.हि॒षम् मन॑व आ॒हु रा॒हु॒र् मन॑वः स्ती॒र्णब॑र्.हिषम् ।

15) 4.7.13.3(15)- मन॑वः । स्ती॒र्णब॑र्.हिषम् ॥

मन॑वः स्ती॒र्णब॑र्.हिष(गग्) स्ती॒र्णब॑र्.हि॒षम् मन॑वो॒ मन॑वः स्ती॒र्णब॑र्.हिषम् ।

16) 4.7.13.3(16)- स्ती॒र्णब॑र्.हिषम् ॥

स्ती॒र्णब॑र्.हि॒षमिति॑ स्ती॒र्ण - ब॒र्.हि॒ष॒म् ।

17) 4.7.13.3(17)- तम् । पत्नी॑भिः । अनु॑ ।

तम् पत्नी॑भिः॒ पत्नी॑भि॒ स्तम् तम् पत्नी॑भि॒ रन्वनु॒ पत्नी॑भि॒ स्तम् तम् पत्नी॑भि॒ रनु॑ ।

18) 4.7.13.3(18)- पत्नी॑भिः । अनु॑ । ग॒च्छे॒म॒ ।

पत्नी॑भि॒ रन्वनु॒ पत्नी॑भिः॒ पत्नी॑भि॒ रनु॑ गच्छेम गच्छे॒मानु॒ पत्नी॑भिः॒ पत्नी॑भि॒ रनु॑ गच्छेम ।

19) 4.7.13.3(19)- अनु॑ । ग॒च्छे॒म॒ । दे॒वाः ।

अनु॑ गच्छेम गच्छे॒मान्वनु॑ गच्छेम देवा देवा गच्छे॒मान्वनु॑ गच्छेम देवाः ।

20) 4.7.13.3(20)– गच्छेम । देवाः । पुत्रैः ।

गच्छेम देवा देवा गच्छेम गच्छेम देवाः पुत्रैः पुत्रैर् देवा गच्छेम गच्छेम देवाः पुत्रैः ।

21) 4.7.13.3(21)– देवाः । पुत्रैः । भ्रातृभिः ।

देवाः पुत्रैः पुत्रैर् देवा देवाः पुत्रैर् भ्रातृभिर् भ्रातृभिः पुत्रैर् देवा देवाः पुत्रैर् भ्रातृभिः ।

22) 4.7.13.3(22)– पुत्रैः । भ्रातृभिः । उत ।

पुत्रैर् भ्रातृभिर् भ्रातृभिः पुत्रैः पुत्रैर् भ्रातृभि रुतोत भ्रातृभिः पुत्रैः पुत्रैर् भ्रातृभि रुत ।

23) 4.7.13.3(23)– भ्रातृभिः । उत । वा ।

भ्रातृभि रुतोत भ्रातृभिर् भ्रातृभि रुत वा वोत भ्रातृभिर् भ्रातृभि रुत वा ।

24) 4.7.13.3(23)– भ्रातृभिः ।

भ्रातृभिरिति भ्रातृ – भिः ।

25) 4.7.13.3(24)– उत । वा । हिरण्यैः ॥

उत वा वोतोत वा हिरण्यैर्. हिरण्यैर् वोतोत वा हिरण्यैः ।

26) 4.7.13.3(25)– वा । हिरण्यैः ॥

वा हिरण्यैर्. हिरण्यैर् वा वा हिरण्यैः ।

27) 4.7.13.3(26)– हिरण्यैः ॥

हिरण्यैरिति हिरण्यैः ।

28) 4.7.13.3(27)– नाकम् । गृह्णानाः । सुकृतस्य ।

नाकम् गृह्णाना गृह्णाना नाकम् नाकम् गृह्णानाः सुकृतस्य सुकृतस्य गृह्णाना नाकम् नाकम् गृह्णानाः सुकृतस्य ।

29) 4.7.13.3(28)- गृह्णानाः । सुकृतस्य । लोके ।

गृह्णानाः सुकृतस्य सुकृतस्य गृह्णाना गृह्णानाः सुकृतस्य लोके लोके सुकृतस्य गृह्णाना गृह्णानाः सुकृतस्य लोके ।

30) 4.7.13.3(29)- सुकृतस्य । लोके । तृतीये ।

सुकृतस्य लोके लोके सुकृतस्य सुकृतस्य लोके तृतीये तृतीये लोके सुकृतस्य सुकृतस्य लोके तृतीये ।

31) 4.7.13.3(29)- सुकृतस्य ।

सुकृतस्येति सु - कृतस्य ।

32) 4.7.13.3(30)- लोके । तृतीये । पृष्ठे ।

लोके तृतीये तृतीये लोके लोके तृतीये पृष्ठे पृष्ठे तृतीये लोके लोके तृतीये पृष्ठे ।

33) 4.7.13.3(31)- तृतीये । पृष्ठे । अधि । (GS -4.7-15)

तृतीये पृष्ठे पृष्ठे तृतीये तृतीये पृष्ठे अध्यधि पृष्ठे तृतीये तृतीये पृष्ठे अधि ।

34) 4.7.13.3(32)- पृष्ठे । अधि । रोचने । (PS11-16,GS -4.7-15)

पृष्ठे अध्यधि पृष्ठे पृष्ठे अधि रोचने रोचने ऽधि पृष्ठे पृष्ठे अधि रोचने ।

35) 4.7.13.3(33)- अधि । रोचने । दिवः ॥ (JD-33,GS -4.7-15)

अधि रोचने रोचने ऽध्यधि रोचने दिवो दिवो रोचने ऽध्यधि रोचने दिवः ।

36) 4.7.13.3(34)- रोचने । दिवः ॥ (JD-33,GS -4.7-15)

रोचने दिवो दिवो रोचने रोचने दिवः ।

37) 4.7.13.3(35)- दिवः ॥

दिव इति दिवः ।

38) 4.7.13.3(36)– आ । वाचः । मद्ध्यम् ।

आ वाचो वाच आ वाचो मद्ध्यम् मद्ध्यं ँवाच आ वाचो मद्ध्यम् ।

39) 4.7.13.3(37)– वाचः । मद्ध्यम् । अरुहत् ।

वाचो मद्ध्यम् मद्ध्यं ँवाचो वाचो मद्ध्य मरुह दरुहन् मद्ध्यं ँवाचो वाचो मद्ध्य मरुहत् ।

40) 4.7.13.3(38)– मद्ध्यम् । अरुहत् । भुरण्युः ।

मद्ध्य मरुह दरुहन् मद्ध्यम् मद्ध्य मरुहद् भुरण्युर् भुरण्यु ररुहन् मद्ध्यम् मद्ध्य मरुहद् भुरण्युः ।

41) 4.7.13.3(39)– अरुहत् । भुरण्युः । अयम् ।

अरुहद् भुरण्युर् भुरण्यु ररुह दरुहद् भुरण्यु रय मयम् भुरण्यु ररुह दरुहद् भुरण्यु रयम् ।

42) 4.7.13.3(40)– भुरण्युः । अयम् । अग्निः ।

भुरण्यु रय मयम् भुरण्युर् भुरण्यु रय मग्नि रग्नि रयम् भुरण्युर् भुरण्यु रय मग्निः ।

43) 4.7.13.3(41)– अयम् । अग्निः । सत्पतिः ।

अय मग्नि रग्नि रय मय मग्निः सत्पतिः सत्पति रग्नि रय मय मग्निः सत्पतिः ।

44) 4.7.13.3(42)– अग्निः । सत्पतिः । चेकितानः ॥

अग्निः सत्पतिः सत्पति रग्नि रग्निः सत्पति श्चेकितान श्चेकितानः सत्पति रग्नि रग्निः सत्पति श्चेकितानः ।

45) 4.7.13.3(43)– सत्पतिः । चेकितानः ॥

सत्पति श्चेकितान श्चेकितानः सत्पतिः सत्पति श्चेकितानः ।

46) 4.7.13.3(43)– सत्पतिः ।

सत्पतिरिति सत् – पतिः ।

47) 4.7.13.3(44)- चेकितानः ॥

चेकितान इति चेकितानः ।

48) 4.7.13.3(45)- पृष्ठे । पृथिव्याः । निहितः ।

पृष्ठे पृथिव्याः पृथिव्याः पृष्ठे पृष्ठे पृथिव्या निहितो निहितः पृथिव्याः पृष्ठे पृष्ठे पृथिव्या निहितः ।

49) 4.7.13.3(46)- पृथिव्याः । निहितः । दविद्युतत् ।

पृथिव्या निहितो निहितः पृथिव्याः पृथिव्या निहितो दविद्युतद् दविद्युतन् निहितः पृथिव्याः पृथिव्या निहितो दविद्युतत् ।

50) 4.7.13.3(47)- निहितः । दविद्युतत् । अधस्पदम् ।

निहितो दविद्युतद् दविद्युतन् निहितो निहितो दविद्युत दधस्पद मधस्पदम् दविद्युतन् निहितो निहितो दविद्युत दधस्पदम् ।

51) 4.7.13.3(47)- निहितः ।

निहित इति नि - हितः ।

52) 4.7.13.3(48)- दविद्युतत् । अधस्पदम् । कृणुते ।

दविद्युत दधस्पद मधस्पदम् दविद्युतद् दविद्युत दधस्पदम् कृणुते कृणुते अधस्पदम् दविद्युतद् दविद्युत दधस्पदम् कृणुते ।

53) 4.7.13.3(49)- अधस्पदम् । कृणुते । ये ।

अधस्पदम् कृणुते कृणुते अधस्पद मधस्पदम् कृणुते ये ये कृणुते अधस्पद मधस्पदम् कृणुते ये ।

54) 4.7.13.3(49)– अधस्पदम् ।

अधस्पदमित्यधः – पदम् ।

55) 4.7.13.3(50)– कृणुते । ये । पृतन्यवः ॥

कृणुते ये ये कृणुते कृणुते ये पृतन्यवः पृतन्यवो ये कृणुते कृणुते ये पृतन्यवः ।

1) 4.7.13.4(1)– ये । पृतन्यवः ॥

ये पृतन्यवः पृतन्यवो ये ये पृतन्यवः ।

2) 4.7.13.4(2)– पृतन्यवः ॥

पृतन्यव इति पृतन्यवः ।

3) 4.7.13.4(3)– अयम् । अग्निः । वीरतमः । (GS –4.7–16)

अय मग्नि रग्नि रय मय मग्निर् वीरतमो वीरतमो ऽग्नि रय मय मग्निर् वीरतमः ।

4) 4.7.13.4(4)– अग्निः । वीरतमः । वयोधाः । (GS –4.7–16)

अग्निर् वीरतमो वीरतमो ऽग्नि रग्निर् वीरतमो वयोधा वयोधा वीरतमो ऽग्नि रग्निर् वीरतमो वयोधाः ।

5) 4.7.13.4(5)– वीरतमः । वयोधाः । सहस्रियः । (GS –4.7–16)

वीरतमो वयोधा वयोधा वीरतमो वीरतमो वयोधाः सहस्रियः सहस्रियो वयोधा वीरतमो वीरतमो वयोधाः सहस्रियः ।

6) 4.7.13.4(5)– वीरतमः । (GS –4.7–16)

वीरतम इति वीर – तमः ।

7) 4.7.13.4(6)– वयोधाः । सहस्रियः । दीप्यताम् । (GS –4.7–16)

वयोधाः सहस्रियः सहस्रियो वयोधा वयोधाः सहस्रियो दीप्यताम् दीप्यता(ग्म्) सहस्रियो वयोधा वयोधाः सहस्रियो दीप्यताम् ।

8) 4.7.13.4(6)– वयोधाः । (GS –4.7–16)

वयोधा इति वयः – धाः ।

9) 4.7.13.4(7)– सहस्रियः । दीप्यताम् । अप्रयुच्छन्न् ॥

सहस्रियो दीप्यताम् दीप्यता(ग्म्) सहस्रियः सहस्रियो दीप्यता मप्रयुच्छन् नप्रयुच्छन् दीप्यता(ग्म्) सहस्रियः सहस्रियो दीप्यता मप्रयुच्छन्न् ।

10) 4.7.13.4(8)– दीप्यताम् । अप्रयुच्छन्न् ॥

दीप्यता मप्रयुच्छन् नप्रयुच्छन् दीप्यताम् दीप्यता मप्रयुच्छन्न् ।

11) 4.7.13.4(9)– अप्रयुच्छन्न् ॥

अप्रयुच्छन्नित्यप्र – युच्छन्न् ।

12) 4.7.13.4(10)– विभ्राजमानः । सरिरस्य । मद्ध्ये ।

विभ्राजमानः सरिरस्य सरिरस्य विभ्राजमानो विभ्राजमानः सरिरस्य मद्ध्ये मद्ध्ये सरिरस्य विभ्राजमानो विभ्राजमानः सरिरस्य मद्ध्ये ।

13) 4.7.13.4(10)– विभ्राजमानः ।

विभ्राजमान इति वि – भ्राजमानः ।

14) 4.7.13.4(11)– सरिरस्य । मद्ध्ये । उप ।

सरिरस्य मद्ध्ये मद्ध्ये सरिरस्य सरिरस्य मद्ध्य उपोप मद्ध्ये सरिरस्य सरिरस्य मद्ध्य उप ।

15) 4.7.13.4(12)– मद्ध्ये । उप । प्र ।

मद्ध्य उपोप मद्ध्ये मद्ध्य उप प्र प्रोप मद्ध्ये मद्ध्य उप प्र ।

16) 4.7.13.4(13)– उप । प्र । यात ।

उप प्र प्रोपोप प्र यात यात प्रोपोप प्र यात ।

17) 4.7.13.4(14)– प्र । यात । दिव्यानि ।

प्र यात यात प्र प्र यात दिव्यानि दिव्यानि यात प्र प्र यात दिव्यानि ।

18) 4.7.13.4(15)– यात । दिव्यानि । धाम ॥

यात दिव्यानि दिव्यानि यात यात दिव्यानि धाम धाम दिव्यानि यात यात दिव्यानि धाम ।

19) 4.7.13.4(16)– दिव्यानि । धाम ॥

दिव्यानि धाम धाम दिव्यानि दिव्यानि धाम ।

20) 4.7.13.4(17)– धाम ॥

धामेति धाम ।

21) 4.7.13.4(18)– सम् । प्र । च्यवद्ध्वम् ।

सम् प्र प्र स(गम्) सम् प्र च्यवद्ध्वम् च्यवद्ध्वम् प्र स(गम्) सम् प्र च्यवद्ध्वम् ।

22) 4.7.13.4(19)– प्र । च्यवद्ध्वम् । अनु ।

प्र च्यवद्ध्वम् च्यवद्ध्वम् प्र प्र च्यवद्ध्व मन्वनु च्यवद्ध्वम् प्र प्र च्यवद्ध्व मनु ।

23) 4.7.13.4(20)– च्यवद्ध्वम् । अनु । सम् ।

च्यवद्ध्व मन्वनु च्यवद्ध्वम् च्यवद्ध्व मनु स(गम्) स मनु च्यवद्ध्वम् च्यवद्ध्व मनु सम् ।

24) 4.7.13.4(21)– अनु । सम् । प्र ।

अनु स(गम्) स मन्वनु सम् प्र प्र स मन्वनु सम् प्र ।

25) 4.7.13.4(22)– सम् । प्र । यात ।

सम् प्र प्र स(गम्) सम् प्र यात यात प्र स(गम्) सम् प्र यात ।

26) 4.7.13.4(23)- प्र । यात । अग्ने । (GS -4.7-17)

प्र यात यात प्र प्र यातग्ने ऽग्ने यात प्र प्र यातग्ने ।

27) 4.7.13.4(24)- यात । अग्ने । पथः । (GS -4.7-17)

यातग्ने ऽग्ने यात यातग्ने पथः पथो ऽग्ने यात यातग्ने पथः ।

28) 4.7.13.4(25)- अग्ने । पथः । देवयानान् । (GS -4.7-17)

अग्ने पथः पथो ऽग्ने ऽग्ने पथो देवयानान् देवयानान् पथो ऽग्ने ऽग्ने पथो देवयानान् ।

29) 4.7.13.4(26)- पथः । देवयानान् । कृणुद्ध्वम् ॥ (GS -4.7-17)

पथो देवयानान् देवयानान् पथः पथो देवयानान् कृणुद्ध्वम् कृणुद्ध्वम् देवयानान् पथः पथो देवयानान् कृणुद्ध्वम् ।

30) 4.7.13.4(27)- देवयानान् । कृणुद्ध्वम् ॥

देवयानान् कृणुद्ध्वम् कृणुद्ध्वम् देवयानान् देवयानान् कृणुद्ध्वम् ।

31) 4.7.13.4(27)- देवयानान् ।

देवयानानिति देव - यानान् ।

32) 4.7.13.4(28)- कृणुद्ध्वम् ॥

कृणुद्ध्वमिति कृणुद्ध्वम् ।

33) 4.7.13.4(29)- अस्मिन्न् । सधस्थे । अधि । (JD-34)

अस्मिन् थ्सधस्थे सधस्थे अस्मिन् नस्मिन् थ्सधस्थे अध्यधि सधस्थे अस्मिन् नस्मिन् थ्सधस्थे अधि ।

34) 4.7.13.4(30)– सधस्थे । अधि । उत्तरस्मिन्न् । (JD–34)

सधस्थे अध्यधि सधस्थे सधस्थे अध्युत्तरस्मिन् नुत्तरस्मिन् नधि सधस्थे सधस्थे अध्युत्तरस्मिन्न् ।

35) 4.7.13.4(30)– सधस्थे । (JD–34)

सधस्थ इति सध – स्थे ।

36) 4.7.13.4(31)– अधि । उत्तरस्मिन्न् । विश्वे । (JD–34)

अध्युत्तरस्मिन् नुत्तरस्मिन् नध्य ध्युत्तरस्मिन्. विश्वे विश्व उत्तरस्मिन् नध्य ध्युत्तरस्मिन्. विश्वे ।

37) 4.7.13.4(32)– उत्तरस्मिन्न् । विश्वे । देवाः ।

उत्तरस्मिन्. विश्वे विश्व उत्तरस्मिन् नुत्तरस्मिन्. विश्वे देवा देवा विश्व उत्तरस्मिन् नुत्तरस्मिन्. विश्वे देवाः ।

38) 4.7.13.4(32)– उत्तरस्मिन्न् ।

उत्तरस्मिन्नित्युत् – तरस्मिन् ।

39) 4.7.13.4(33)– विश्वे । देवाः । यजमानः ।

विश्वे देवा देवा विश्वे विश्वे देवा यजमानो यजमानो देवा विश्वे विश्वे देवा यजमानः ।

40) 4.7.13.4(34)– देवाः । यजमानः । च ।

देवा यजमानो यजमानो देवा देवा यजमानश्च च यजमानो देवा देवा यजमानश्च ।

41) 4.7.13.4(35)– यजमानः । च । सीदत ॥

यजमानश्च च यजमानो यजमानश्च सीदत सीदत च यजमानो यजमानश्च सीदत ।

42) 4.7.13.4(36)– च । सीदत ॥

च सीदत सीदत च च सीदत ।

43) 4.7.13.4(37)- सीदत ॥

सीदतेति सीदत ।

44) 4.7.13.4(38)- येन । सहस्रम् । वहसि । (PS-3.12,JD-13)

येना सहस्र(ग्म्) सहस्रं येन येना सहस्रं वहसि वहसि सहस्रं येन येना सहस्रं वहसि ।

45) 4.7.13.4(39)- सहस्रम् । वहसि । येन । (JD-13)

सहस्रं वहसि वहसि सहस्र(ग्म्) सहस्रं वहसि येन येन वहसि सहस्र(ग्म्) सहस्रं वहसि येन ।

46) 4.7.13.4(40)- वहसि । येन । अग्ने ।

वहसि येन येन वहसि वहसि येनाग्ने अग्ने येन वहसि वहसि येनाग्ने ।

47) 4.7.13.4(41)- येन । अग्ने । सर्ववेदसम् ॥

येनाग्ने अग्ने येन येनाग्ने सर्ववेदस(ग्म्) सर्ववेदस मग्ने येन येनाग्ने सर्ववेदसम् ।

48) 4.7.13.4(42)- अग्ने । सर्ववेदसम् ॥ (JM 74,JD 34,GD 30)

अग्ने सर्ववेदस(ग्म्) सर्ववेदस मग्ने अग्ने सर्ववेदसम् ।

49) 4.7.13.4(43)- सर्ववेदसम् ॥

सर्ववेदसमिति सर्व - वेदसम् ।

50) 4.7.13.4(44)- तेन । इमम् । यज्ञम् ।

तेनेम मिमम् तेन तेनेमं यज्ञं यज्ञ मिमम् तेन तेनेमं यज्ञम् ।

51) 4.7.13.4(45)- इमम् । यज्ञम् । नः ।

इमं यज्ञं यज्ञ मिम मिमं यज्ञम् नो नो यज्ञ मिम मिमं यज्ञम् नः ।

52) 4.7.13.4(46)- यज्ञम् । नः । वह ।

यज्ञम् नो नो यज्ञं ँयज्ञम् नो वह वह नो यज्ञं ँयज्ञम् नो वह ।

53) 4.7.13.4(47)- नः । वह । देवयानः ।

नो वह वह नो नो वह देवयानो देवयानो वह नो नो वह देवयानः ।

54) 4.7.13.4(48)- वह । देवयानः । यः ।

वह देवयानो देवयानो वह वह देवयानो यो यो देवयानो वह वह देवयानो यः ।

55) 4.7.13.4(49)- देवयानः । यः । उत्तमः ॥

देवयानो यो यो देवयानो देवयानो य उत्तम उत्तमो यो देवयानो देवयानो य उत्तमः ।

56) 4.7.13.4(49)- देवयानः ।

देवयान इति देव - यानः ।

57) 4.7.13.4(50)- यः । उत्तमः ॥

य उत्तम उत्तमो यो य उत्तमः ।

1) 4.7.13.5(1)- उत्तमः ॥

उत्तम इत्युत् - तमः ।

2) 4.7.13.5(2)- उत् । बुद्ध्यस्व । अग्ने ।

उद् बुद्ध्यस्व बुद्ध्यस्वो दुद् बुद्ध्यस्वाग्ने अग्ने बुद्ध्यस्वो दुद् बुद्ध्यस्वाग्ने ।

3) 4.7.13.5(3)- बुद्ध्यस्व । अग्ने । प्रति ।

बुद्ध्यस्वाग्ने अग्ने बुद्ध्यस्व बुद्ध्यस्वाग्ने प्रति प्रत्यग्ने बुद्ध्यस्व बुद्ध्यस्वाग्ने प्रति ।

4) 4.7.13.5(4)- अग्ने । प्रति । जागृहि ।

अग्ने प्रति प्रत्यग्ने अग्ने प्रति जागृहि जागृहि प्रत्यग्ने अग्ने प्रति जागृहि ।

5) 4.7.13.5(5)- प्रति । जागृहि । एनम् ।

प्रति जागृहि जागृहि प्रति प्रति जागृह्येन मेनम् जागृहि प्रति प्रति जागृह्येनम् ।

6) 4.7.13.5(6)- जागृहि । एनम् । इष्टापूर्ते ।

जागृह्येन मेनम् जागृहि जागृह्येन मिष्टापूर्ते इष्टापूर्ते एनम् जागृहि जागृह्येन मिष्टापूर्ते ।

7) 4.7.13.5(7)- एनम् । इष्टापूर्ते । सम् ।

एन मिष्टापूर्ते इष्टापूर्ते एन मेन मिष्टापूर्ते स(ग्म्) स मिष्टापूर्ते एन मेन मिष्टापूर्ते सम् ।

8) 4.7.13.5(8)- इष्टापूर्ते । सम् । सृजेथाम् ।

इष्टापूर्ते स(ग्म्) स मिष्टापूर्ते इष्टापूर्ते स(ग्म्) सृजेथा(ग्म्) सृजेथा(ग्म्) स मिष्टापूर्ते इष्टापूर्ते स(ग्म्) सृजेथाम् ।

9) 4.7.13.5(8)- इष्टापूर्ते ।

इष्टापूर्ते इतीष्टा - पूर्ते ।

10) 4.7.13.5(9)- सम् । सृजेथाम् । अयम् ।

स(ग्म्) सृजेथा(ग्म्) सृजेथा(ग्म्) स(ग्म्) स(ग्म्) सृजेथा मय मय(ग्म्) सृजेथा(ग्म्) स(ग्म्) स(ग्म्) सृजेथा मयम् ।

11) 4.7.13.5(10)- सृजेथाम् । अयम् । च ॥

सृजेथा मय मय(ग्म्) सृजेथा(ग्म्) सृजेथा मयम् च चाय(ग्म्) सृजेथा(ग्म्) सृजेथा मयम् च ।

12) 4.7.13.5(11)- अयम् । च ॥

अयम् च चाय मयम् च ।

13) 4.7.13.5(12)– च ॥

चेति च ।

14) 4.7.13.5(13)– पुनः । कृण्वन्न् । त्वा ।

पुनः कृण्वन् कृण्वन् पुनः पुनः कृण्व(गग्) स्त्वा त्वा कृण्वन् पुनः पुनः कृण्व(गग्) स्त्वा ।

15) 4.7.13.5(14)– कृण्वन्न् । त्वा । पितरम् ।

कृण्व(गग्) स्त्वा त्वा कृण्वन् कृण्व(गग्) स्त्वा पितरम् पितरम् त्वा कृण्वन् कृण्व(गग्) स्त्वा पितरम् ।

16) 4.7.13.5(15)– त्वा । पितरम् । युवानम् ।

त्वा पितरम् पितरम् त्वा त्वा पितरं ँयुवानं ँयुवानम् पितरम् त्वा त्वा पितरं ँयुवानम् ।

17) 4.7.13.5(16)– पितरम् । युवानम् । अन्वाता(ग्म्)सीत् ।

पितरं ँयुवानं ँयुवानम् पितरम् पितरं ँयुवान मन्वाता(ग्म्)सी दन्वाता(ग्म्)सीद् युवानम् पितरम् पितरं ँयुवान मन्वाता(ग्म्)सीत् ।

18) 4.7.13.5(17)– युवानम् । अन्वाता(ग्म्)सीत् । त्वयि ।

युवान मन्वाता(ग्म्)सी दन्वाता(ग्म्)सीद् युवानं ँयुवान मन्वाता(ग्म्)सीत् त्वयि त्वय्यन्वाता(ग्म्)सीद् युवानं ँयुवान मन्वाता(ग्म्)सीत् त्वयि ।

19) 4.7.13.5(18)– अन्वाता(ग्म्)सीत् । त्वयि । तन्तुम् ।

अन्वाता(ग्म्)सीत् त्वयि त्वय्यन्वाता(ग्म्)सी दन्वाता(ग्म्)सीत् त्वयि तन्तुम् तन्तुम् त्वय्यन्वाता(ग्म्)सी दन्वाता(ग्म्)सीत् त्वयि तन्तुम् ।

20) 4.7.13.5(18)– अन्वाता(ग्म्)सीत् ।

अन्वाता(ग्म्)सीदित्यनु – आता(ग्म्)सीत् ।

21) 4.7.13.5(19)- त्वयि । तन्तुम् । एतम् ॥

त्वयि तन्तुम् तन्तुम् त्वयि त्वयि तन्तु मेत मेतम् तन्तुम् त्वयि त्वयि तन्तु मेतम् ।

22) 4.7.13.5(20)- तन्तुम् । एतम् ॥

तन्तु मेत मेतम् तन्तुम् तन्तु मेतम् ।

23) 4.7.13.5(21)- एतम् ॥

एतमित्येतम् ।

24) 4.7.13.5(22)- अयम् । ते । योनिः । (GS -4.7-18)

अयम् ते ते ऽय मयम् ते योनिर् योनि स्ते ऽय मयम् ते योनिः ।

25) 4.7.13.5(23)- ते । योनिः । ऋत्वियः । (GS -4.7-18)

ते योनिर् योनि स्ते ते योनिर्. ऋत्विय ऋत्वियो योनि स्ते ते योनिर्. ऋत्वियः ।

26) 4.7.13.5(24)- योनिः । ऋत्वियः । यतः । (GS -4.7-18)

योनिर्. ऋत्विय ऋत्वियो योनिर् योनिर्. ऋत्वियो यतो यत ऋत्वियो योनिर् योनिर्. ऋत्वियो यतः ।

27) 4.7.13.5(25)- ऋत्वियः । यतः । जातः । (GS -4.7-18)

ऋत्वियो यतो यत ऋत्विय ऋत्वियो यतो जातो जातो यत ऋत्विय ऋत्वियो यतो जातः ।

28) 4.7.13.5(26)- यतः । जातः । अरोचथाः ॥

यतो जातो जातो यतो यतो जातो अरोचथा अरोचथा जातो यतो यतो जातो अरोचथाः ।

29) 4.7.13.5(27)- जातः । अरोचथाः ॥

जातो अरोचथा अरोचथा जातो जातो अरोचथाः ।

30) 4.7.13.5(28)– अरोचथाः ॥

अरोचथा इत्यरोचथाः ।

31) 4.7.13.5(29)– तम् । जानन्न् । अग्ने ।

तम् जानन् जानन् तम् तम् जानन् नग्ने अग्ने जानन् तम् तम् जानन् नग्ने ।

32) 4.7.13.5(30)– जानन्न् । अग्ने । आ ।

जानन् नग्ने अग्ने जानन् जानन् नग्न आ ऽग्ने जानन् जानन् नग्न आ ।

33) 4.7.13.5(31)– अग्ने । आ । रोह ।

अग्न आ ऽग्ने अग्न आ रोह रोहा ऽग्ने अग्न आ रोह ।

34) 4.7.13.5(32)– आ । रोह । अथ ।

आ रोह रोहा रोहाथाथ रोहा रोहाथ ।

35) 4.7.13.5(33)– रोह । अथ । नः ।

रोहाथाथ रोह रोहाथा नो नो अथ रोह रोहाथा नः ।

36) 4.7.13.5(34)– अथ । नः । वर्द्धय ।

अथा नो नो अथाथा नो वर्द्धय वर्द्धय नो अथाथा नो वर्द्धय ।

37) 4.7.13.5(35)– नः । वर्द्धय । रयिम् ॥

नो वर्द्धय वर्द्धय नो नो वर्द्धया रयि(ग्म्) रयिं ँवर्द्धय नो नो वर्द्धया रयिम् ।

38) 4.7.13.5(36)– वर्द्धय । रयिम् ॥

वर्द्धया रयि(ग्म्) रयिं ँवर्द्धय वर्द्धया रयिम् ।

39) 4.7.13.5(37)– रयिम् ॥

रयिमिति रयिम् ।

===========

## 4.7.14 अनुवाकम् 14 – घनम्

1) 4.7.14.1(1)– मम । अग्ने । वर्चः । (GS –4.7–19)

ममाग्ने अग्ने मम ममाग्ने वर्चो वर्चो अग्ने मम ममाग्ने वर्चः ।

2) 4.7.14.1(2)– अग्ने । वर्चः । विहवेषु । (GS –4.7–19)

अग्ने वर्चो वर्चो अग्ने अग्ने वर्चो विहवेषु विहवेषु वर्चो अग्ने अग्ने वर्चो विहवेषु ।

3) 4.7.14.1(3)– वर्चः । विहवेषु । अस्तु । (GS –4.7–19)

वर्चो विहवेषु विहवेषु वर्चो वर्चो विहवे ष्वस्त्वस्तु विहवेषु वर्चो वर्चो विहवे ष्वस्तु ।

4) 4.7.14.1(4)– विहवेषु । अस्तु । वयम् । (GS –4.7–19)

विहवे ष्वस्त्वस्तु विहवेषु विहवे ष्वस्तु वयं ँवय मस्तु विहवेषु विहवे ष्वस्तु वयम् ।

5) 4.7.14.1(4)– विहवेषु । (GS –4.7–19)

विहवेष्विति वि – हवेषु ।

6) 4.7.14.1(5)– अस्तु । वयम् । त्वा । (GS –4.7–19)

अस्तु वयं ँवय मस्त्वस्तु वयम् त्वा त्वा वय मस्त्वस्तु वयम् त्वा ।

7) 4.7.14.1(6)– वयम् । त्वा । इन्धानाः ।

वयम् त्वा त्वा वयं ँवयम् त्वेन्धाना इन्धाना स्त्वा वयं ँवयम् त्वेन्धानाः ।

8) 4.7.14.1(7)– त्वा । इन्धानाः । तनुवम् ।

त्वेन्धाना इन्धाना स्त्वा त्वेन्धाना स्तनुवम् तनुव मिन्धाना स्त्वा त्वेन्धाना स्तनुवम् ।

9) 4.7.14.1(8)– इन्धानाः । तनुवम् । पुषेम ॥

इन्धाना स्तनुवम् तनुव मिन्धाना इन्धाना स्तनुवम् पुषेम पुषेम तनुव मिन्धाना इन्धाना स्तनुवम् पुषेम ।

10) 4.7.14.1(9)– तनुवम् । पुषेम ॥

तनुवम् पुषेम पुषेम तनुवम् तनुवम् पुषेम ।

11) 4.7.14.1(10)– पुषेम ॥

पुषेमेति पुषेम ।

12) 4.7.14.1(11)– मह्यम् । नमन्ताम् । प्रदिशः ।

मह्यम् नमन्ताम् नमन्ताम् मह्यम् मह्यम् नमन्ताम् प्रदिशः प्रदिशो नमन्ताम् मह्यम् मह्यम् नमन्ताम् प्रदिशः ।

13) 4.7.14.1(12)– नमन्ताम् । प्रदिशः । चतस्रः ।

नमन्ताम् प्रदिशः प्रदिशो नमन्ताम् नमन्ताम् प्रदिश श्चतस्र श्चतस्रः प्रदिशो नमन्ताम् नमन्ताम् प्रदिश श्चतस्रः ।

14) 4.7.14.1(13)– प्रदिशः । चतस्रः । त्वया ।

प्रदिश श्चतस्र श्चतस्रः प्रदिशः प्रदिश श्चतस्र स्त्वया त्वया चतस्रः प्रदिशः प्रदिश श्चतस्र स्त्वया ।

15) 4.7.14.1(13)– प्रदिशः ।

प्रदिश इति प्र – दिशः ।

16) 4.7.14.1(14)– चतस्रः । त्वया । अद्ध्यक्षेण ।

चतस्र स्त्वया त्वया चतस्र श्चतस्र स्त्वया ऽद्ध्यक्षेणा द्ध्यक्षेण त्वया चतस्र श्चतस्र स्त्वया ऽद्ध्यक्षेण ।

17) 4.7.14.1(15)– त्वया । अद्ध्यक्षेण । पृतनाः ।

त्वया ऽद्ध्यक्षेणा द्ध्यक्षेण त्वया त्वया ऽद्ध्यक्षेण पृतनाः पृतना अद्ध्यक्षेण त्वया त्वया ऽद्ध्यक्षेण पृतनाः ।

18) 4.7.14.1(16)- अद्ध्यक्षेण । पृतनाः । जयेम ॥

अद्ध्यक्षेण पृतनाः पृतना अद्ध्यक्षे णाद्ध्यक्षेण पृतना जयेम जयेम पृतना अद्ध्यक्षे णाद्ध्यक्षेण पृतना जयेम ।

19) 4.7.14.1(16)- अद्ध्यक्षेण ।

अद्ध्यक्षेणेत्यधि - अक्षेण ।

20) 4.7.14.1(17)- पृतनाः । जयेम ॥

पृतना जयेम जयेम पृतनाः पृतना जयेम ।

21) 4.7.14.1(18)- जयेम ॥

जयेमेति जयेम ।

22) 4.7.14.1(19)- मम । देवाः । विहवे ।

मम देवा देवा मम मम देवा विहवे विहवे देवा मम मम देवा विहवे ।

23) 4.7.14.1(20)- देवाः । विहवे । सन्तु ।

देवा विहवे विहवे देवा देवा विहवे सन्तु सन्तु विहवे देवा देवा विहवे सन्तु ।

24) 4.7.14.1(21)- विहवे । सन्तु । सर्वे ।

विहवे सन्तु सन्तु विहवे विहवे सन्तु सर्वे सर्वे सन्तु विहवे विहवे सन्तु सर्वे ।

25) 4.7.14.1(21)- विहवे ।

विहव इति वि - हवे ।

26) 4.7.14.1(22)- सन्तु । सर्वे । इन्द्रावन्तः ।

सन्तु सर्वे सर्वे सन्तु सन्तु सर्व इन्द्रावन्त इन्द्रावन्तः सर्वे सन्तु सन्तु सर्व इन्द्रावन्तः ।

27) 4.7.14.1(23)- सर्वे । इन्द्रावन्तः । मरुतः ।

सर्व इन्द्रावन्त इन्द्रावन्तः सर्वे सर्व इन्द्रावन्तो मरुतो मरुत इन्द्रावन्तः सर्वे सर्व इन्द्रावन्तो मरुतः ।

28) 4.7.14.1(24)- इन्द्रावन्तः । मरुतः । विष्णुः ।

इन्द्रावन्तो मरुतो मरुत इन्द्रावन्त इन्द्रावन्तो मरुतो विष्णुर् विष्णुर् मरुत इन्द्रावन्त इन्द्रावन्तो मरुतो विष्णुः ।

29) 4.7.14.1(24)- इन्द्रावन्तः ।

इन्द्रावन्त इतीन्द्र - वन्तः ।

30) 4.7.14.1(25)- मरुतः । विष्णुः । अग्निः ॥

मरुतो विष्णुर् विष्णुर् मरुतो मरुतो विष्णु रग्नि रग्निर् विष्णुर् मरुतो मरुतो विष्णु रग्निः ।

31) 4.7.14.1(26)- विष्णुः । अग्निः ॥

विष्णु रग्नि रग्निर् विष्णुर् विष्णु रग्निः ।

32) 4.7.14.1(27)- अग्निः ॥

अग्निरित्यग्निः ।

33) 4.7.14.1(28)- मम । अन्तरिक्षम् । उरु । (GS -4.7-20)

ममान्तरिक्ष मन्तरिक्षम् मम ममान्तरिक्ष मुरू(1)र्वन्तरिक्षम् मम ममान्तरिक्ष मुरु ।

34) 4.7.14.1(29)- अन्तरिक्षम् । उरु । गोपम् । (GS -4.7-20)

अन्तरिक्ष मुरू(1)र्वन्तरिक्ष मन्तरिक्ष मुरु गोपम् गोप मुर्वन्तरिक्ष मन्तरिक्ष मुरु गोपम् ।

35) 4.7.14.1(30)- उरु । गोपम् । अस्तु । (GS -4.7-20)

उरु गोपम् गोप मुरूरु गोप मस्त्वस्तु गोप मुरूरु गोप मस्तु ।

36) 4.7.14.1(31)- गोपम् । अस्तु । मह्यम् । (GS -4.7-20)

गोप मस्त्वस्तु गोपम् गोप मस्तु मह्यम् मह्य मस्तु गोपम् गोप मस्तु मह्यम् ।

37) 4.7.14.1(32)- अस्तु । मह्यम् । वातः । (GS -4.7-20)

अस्तु मह्यम् मह्य मस्त्वस्तु मह्यं ँवातो वातो मह्य मस्त्वस्तु मह्यं ँवातः ।

38) 4.7.14.1(33)- मह्यम् । वातः । पवताम् ।

मह्यं ँवातो वातो मह्यम् मह्यं ँवातः पवताम् पवतां ँवातो मह्यम् मह्यं ँवातः पवताम् ।

39) 4.7.14.1(34)- वातः । पवताम् । कामे ।

वातः पवताम् पवतां ँवातो वातः पवताम् कामे कामे पवतां ँवातो वातः पवताम् कामे ।

40) 4.7.14.1(35)- पवताम् । कामे । अस्मिन्न् ॥

पवताम् कामे कामे पवताम् पवताम् कामे अस्मिन् नस्मिन् कामे पवताम् पवताम् कामे अस्मिन्न् ।

41) 4.7.14.1(36)- कामे । अस्मिन्न् ॥

कामे अस्मिन् नस्मिन् कामे कामे अस्मिन्न् ।

42) 4.7.14.1(37)- अस्मिन्न् ॥

अस्मिन्नित्यस्मिन्न् ।

43) 4.7.14.1(38)- मयि । देवाः । द्रविणम् ।

मयि देवा देवा मयि मयि देवा द्रविणम् द्रविणम् देवा मयि मयि देवा द्रविणम् ।

44) 4.7.14.1(39)- देवाः । द्रविणम् । आ ।

देवा द्रविणम् द्रविणम् देवा देवा द्रविण मा द्रविणम् देवा देवा द्रविण मा ।

45) 4.7.14.1(40)– द्रविणम् । आ । यजन्ताम् ।

द्रविण मा द्रविणम् द्रविण मा यजन्तां ँयजन्ता मा द्रविणम् द्रविण मा यजन्ताम् ।

46) 4.7.14.1(41)– आ । यजन्ताम् । मयि ।

आ यजन्तां ँयजन्ता मा यजन्ताम् मयि मयि यजन्ता मा यजन्ताम् मयि ।

47) 4.7.14.1(42)– यजन्ताम् । मयि । आशीः ।

यजन्ताम् मयि मयि यजन्तां ँयजन्ताम् मय्याशी राशीर् मयि यजन्तां ँयजन्ताम् मय्याशीः ।

48) 4.7.14.1(43)– मयि । आशीः । अस्तु ।

मय्याशी राशीर् मयि मय्याशी रस्त्व स्त्वाशीर् मयि मय्याशी रस्तु ।

49) 4.7.14.1(44)– आशीः । अस्तु । मयि ।

आशी रस्त्व स्त्वाशी राशी रस्तु मयि मय्य स्त्वाशी राशी रस्तु मयि ।

50) 4.7.14.1(44)– आशीः ।

आशीरित्या – शीः ।

51) 4.7.14.1(45)– अस्तु । मयि । देवहूतिः ॥

अस्तु मयि मय्यस्त्वस्तु मयि देवहूतिर् देवहूतिर् मय्यस्त्वस्तु मयि देवहूतिः ।

52) 4.7.14.1(46)– मयि । देवहूतिः ॥

मयि देवहूतिर् देवहूतिर् मयि मयि देवहूतिः ।

53) 4.7.14.1(47)– देवहूतिः ॥

देवहूतिरिति देव – हूतिः ।

54) 4.7.14.1(48)– दैव्या । होतारा । वनिषन्त ।

दैव्या होतारा होतारा दैव्या दैव्या होतारा वनिषन्त वनिषन्त होतारा दैव्या दैव्या होतारा वनिषन्त ।

55) 4.7.14.1(49)- होतारा । वनिषन्त । पूर्वे ।

होतारा वनिषन्त वनिषन्त होतारा होतारा वनिषन्त पूर्वे पूर्वे वनिषन्त होतारा होतारा वनिषन्त पूर्वे ।

56) 4.7.14.1(50)- वनिषन्त । पूर्वे । अरिष्टाः ।

वनिषन्त पूर्वे पूर्वे वनिषन्त वनिषन्त पूर्वे ऽरिष्टा अरिष्टाः पूर्वे वनिषन्त वनिषन्त पूर्वे ऽरिष्टाः ।

1) 4.7.14.2(1)- पूर्वे । अरिष्टाः । स्याम ।

पूर्वे ऽरिष्टा अरिष्टाः पूर्वे पूर्वे ऽरिष्टाः स्याम स्यामा रिष्टाः पूर्वे पूर्वे ऽरिष्टाः स्याम ।

2) 4.7.14.2(2)- अरिष्टाः । स्याम । तनुवा ।

अरिष्टाः स्याम स्यामा रिष्टा अरिष्टाः स्याम तनुवा तनुवा स्यामा रिष्टा अरिष्टाः स्याम तनुवा ।

3) 4.7.14.2(3)- स्याम । तनुवा । सुवीराः ॥

स्याम तनुवा तनुवा स्याम स्याम तनुवा सुवीराः सुवीरा स्तनुवा स्याम स्याम तनुवा सुवीराः ।

4) 4.7.14.2(4)- तनुवा । सुवीराः ॥

तनुवा सुवीराः सुवीरा स्तनुवा तनुवा सुवीराः ।

5) 4.7.14.2(5)- सुवीराः ॥

सुवीरा इति सु - वीराः ।

6) 4.7.14.2(6)- मह्यम् । यजन्तु । मम ।

मह्यं ँयजन्तु यजन्तु मह्यम् मह्यं ँयजन्तु मम मम यजन्तु मह्यम् मह्यं ँयजन्तु मम ।

7) 4.7.14.2(7)- यजन्तु । मम । यानि ।

यजन्तु मम मम यजन्तु यजन्तु मम यानि यानि मम यजन्तु यजन्तु मम यानि ।

8) 4.7.14.2(8)– मम । यानि । ह॒व्या ।

मम॒ यानि॒ यानि॒ मम॒ मम॒ यानि॑ ह॒व्या ह॒व्या यानि॒ मम॒ मम॒ यानि॑ ह॒व्या ।

9) 4.7.14.2(9)– यानि॑ । ह॒व्या । आकू॑तिः ।

यानि॑ ह॒व्या ह॒व्या यानि॒ यानि॑ ह॒व्या ऽऽकू॑ति॒ राकू॑तिर्. ह॒व्या यानि॒ यानि॑ ह॒व्या ऽऽकू॑तिः ।

10) 4.7.14.2(10)– ह॒व्या । आकू॑तिः । स॒त्या ।

ह॒व्या ऽऽकू॑ति॒ राकू॑तिर्. ह॒व्या ह॒व्या ऽऽकू॑तिः स॒त्या स॒त्या ऽऽकू॑तिर्. ह॒व्या ह॒व्या ऽऽकू॑तिः स॒त्या ।

11) 4.7.14.2(11)– आकू॑तिः । स॒त्या । मन॑सः ।

आकू॑तिः स॒त्या स॒त्या ऽऽकू॑ति॒ राकू॑तिः स॒त्या मन॑सो॒ मन॑सः स॒त्या ऽऽकू॑ति॒ राकू॑तिः स॒त्या मन॑सः ।

12) 4.7.14.2(11)– आकू॑तिः ।

आकू॑ति॒रित्या – कू॒ति॒ः ।

13) 4.7.14.2(12)– स॒त्या । मन॑सः । मे॒ ।

स॒त्या मन॑सो॒ मन॑सः स॒त्या स॒त्या मन॑सो मे मे॒ मन॑सः स॒त्या स॒त्या मन॑सो मे ।

14) 4.7.14.2(13)– मन॑सः । मे॒ । अ॒स्तु॒ ॥

मन॑सो मे मे॒ मन॑सो॒ मन॑सो मे अस्त्वस्तु मे॒ मन॑सो॒ मन॑सो मे अस्तु ।

15) 4.7.14.2(14)– मे॒ । अ॒स्तु॒ ॥

मे॒ अ॒स्त्व॒स्तु॒ मे॒ मे॒ अ॒स्तु॒ ।

16) 4.7.14.2(15)– अ॒स्तु॒ ॥

अ॒स्त्वित्य॑स्तु ।

17) 4.7.14.2(16)- एनः । मा । नि । (GS -4.7-21)

एनो मा मैन एनो मा नि नि मैन एनो मा नि ।

18) 4.7.14.2(17)- मा । नि । गाम् । (GS -4.7-21)

मा नि नि मा मा नि गाम् गाम् नि मा मा नि गाम् ।

19) 4.7.14.2(18)- नि । गाम् । कतमत् । (GS -4.7-21)

नि गाम् गाम् नि नि गाम् कतमत् कतमद् गाम् नि नि गाम् कतमत् ।

20) 4.7.14.2(19)- गाम् । कतमत् । चन । (GS -4.7-21)

गाम् कतमत् कतमद् गाम् गाम् कतमच् चन चन कतमद् गाम् गाम् कतमच् चन ।

21) 4.7.14.2(20)- कतमत् । चन । अहम् । (GS -4.7-21)

कतमच् चन चन कतमत् कतमच् चनाह महम् चन कतमत् कतमच् चनाहम् ।

22) 4.7.14.2(21)- चन । अहम् । विश्वे । (GS -4.7-21)

चनाह महम् चन चनाहं ँविश्वे विश्वे ऽहम् चन चनाहं ँविश्वे ।

23) 4.7.14.2(22)- अहम् । विश्वे । देवासः । (GS -4.7-21)

अहं ँविश्वे विश्वे ऽह महं ँविश्वे देवासो देवासो विश्वे ऽह महं ँविश्वे देवासः ।

24) 4.7.14.2(23)- विश्वे । देवासः । अधि । (GS -4.7-21)

विश्वे देवासो देवासो विश्वे विश्वे देवासो अध्यधि देवासो विश्वे विश्वे देवासो अधि ।

25) 4.7.14.2(24)- देवासः । अधि । वोचत । (GS -4.7-21)

देवासो अध्यधि देवासो देवासो अधि वोचत वोचताधि देवासो देवासो अधि वोचत ।

26) 4.7.14.2(25)- अधि । वोचत । मे ॥ (GS -4.7-21)

अधि वोचत वोचताध्यधि वोचता मे मे वोचताध्यधि वोचता मे ।

27) 4.7.14.2(26)– वोचत । मे ॥

वोचता मे मे वोचत वोचता मे ।

28) 4.7.14.2(27)– मे ॥

म इति मे ।

29) 4.7.14.2(28)– देवीः । षडुर्वीः । उरु । (GS –4.7–22)

देवी ष्षडुर्वी ष्षडुर्वीर् देवीर् देवी ष्षडुर्वी रुरूरु षडुर्वीर् देवीर् देवी ष्षडुर्वी रुरु ।

30) 4.7.14.2(29)– षडुर्वीः । उरु । नः । (GS –4.7–22)

षडुर्वी रुरूरु षडुर्वी ष्षडुर्वी रुरु णो न उरु षडुर्वी ष्षडुर्वी रुरु णः ।

31) 4.7.14.2(29)– षडुर्वीः । (GS –4.7–22)

षडुर्वीरिति षट् – उर्वीः ।

32) 4.7.14.2(30)– उरु । नः । कृणोत । (GS –4.7–22)

उरु णो न उरूरु णः कृणोत कृणोत न उरूरु णः कृणोत ।

33) 4.7.14.2(31)– नः । कृणोत । विश्वे । (GS –4.7–22)

नः कृणोत कृणोत नो नः कृणोत विश्वे विश्वे कृणोत नो नः कृणोत विश्वे ।

34) 4.7.14.2(32)– कृणोत । विश्वे । देवासः । (GS –4.7–22)

कृणोत विश्वे विश्वे कृणोत कृणोत विश्वे देवासो देवासो विश्वे कृणोत कृणोत विश्वे देवासः ।

35) 4.7.14.2(33)– विश्वे । देवासः । इह ।

विश्वे देवासो देवासो विश्वे विश्वे देवास इहेह देवासो विश्वे विश्वे देवास इह ।

36) 4.7.14.2(34)– देवासः । इह । वीरयद्ध्वम् ॥

देवास इहेह देवासो देवास इह वीरयद्ध्वं ँवीरयद्ध्व मिह देवासो देवास इह वीरयद्ध्वम् ।

37) 4.7.14.2(35)- इह । वीरयद्ध्वम् ॥

इह वीरयद्ध्वं ँवीरयद्ध्व मिहेह वीरयद्ध्वम् ।

38) 4.7.14.2(36)- वीरयद्ध्वम् ॥

वीरयद्ध्वमिति वीरयद्ध्वम् ।

39) 4.7.14.2(37)- मा । हास्महि । प्रजया ।

मा हास्महि हास्महि मा मा हास्महि प्रजया प्रजया हास्महि मा मा हास्महि प्रजया ।

40) 4.7.14.2(38)- हास्महि । प्रजया । मा ।

हास्महि प्रजया प्रजया हास्महि हास्महि प्रजया मा मा प्रजया हास्महि हास्महि प्रजया मा ।

41) 4.7.14.2(39)- प्रजया । मा । तनूभिः ।

प्रजया मा मा प्रजया प्रजया मा तनूभि स्तनूभिर् मा प्रजया प्रजया मा तनूभिः ।

42) 4.7.14.2(39)- प्रजया ।

प्रजयेति प्र - जया ।

43) 4.7.14.2(40)- मा । तनूभिः । मा ।

मा तनूभि स्तनूभिर् मा मा तनूभिर् मा मा तनूभिर् मा मा तनूभिर् मा ।

44) 4.7.14.2(41)- तनूभिः । मा । रधाम ।

तनूभिर् मा मा तनूभि स्तनूभिर् मा रधाम रधाम मा तनूभि स्तनूभिर् मा रधाम ।

45) 4.7.14.2(42)- मा । रधाम । द्विषते ।

मा रधाम रधाम मा मा रधाम द्विषते द्विषते रधाम मा मा रधाम द्विषते ।

46) 4.7.14.2(43)- रधाम । द्विषते । सोम ।

रधाम द्विषते द्विषते रधाम रधाम द्विषते सोम सोम द्विषते रधाम रधाम द्विषते सोम ।

47) 4.7.14.2(44)- द्विषते । सोम । राजन्न् ॥

द्विषते सोम सोम द्विषते द्विषते सोम राजन् राजन् थ्सोम द्विषते द्विषते सोम राजन्न् ।

48) 4.7.14.2(45)- सोम । राजन्न् ॥

सोम राजन् राजन् थ्सोम सोम राजन्न् ।

49) 4.7.14.2(46)- राजन्न् ॥

राजन्निति राजन्न् ।

50) 4.7.14.2(47)- अग्निः । मन्युम् । प्रतिनुदन्न् ।

अग्निर् मन्युम् मन्यु मग्नि रग्निर् मन्युम् प्रतिनुदन् प्रतिनुदन् मन्यु मग्नि रग्निर् मन्युम् प्रतिनुदन्न् ।

51) 4.7.14.2(48)- मन्युम् । प्रतिनुदन्न् । पुरस्तात् ।

मन्युम् प्रतिनुदन् प्रतिनुदन् मन्युम् मन्युम् प्रतिनुदन् पुरस्तात् पुरस्तात् प्रतिनुदन् मन्युम् मन्युम् प्रतिनुदन् पुरस्तात् ।

52) 4.7.14.2(49)- प्रतिनुदन्न् । पुरस्तात् । अदब्धः ।

प्रतिनुदन् पुरस्तात् पुरस्तात् प्रतिनुदन् प्रतिनुदन् पुरस्ता ददब्धो अदब्धः पुरस्तात् प्रतिनुदन् प्रतिनुदन् पुरस्ता ददब्धः ।

53) 4.7.14.2(49)- प्रतिनुदन्न् ।

प्रतिनुदन्निति प्रति - नुदन्न् ।

54) 4.7.14.2(50)- पुरस्तात् । अदब्धः । गोपाः ।

पुरस्ता ददब्धो अदब्धः पुरस्तात् पुरस्ता ददब्धो गोपा गोपा अदब्धः पुरस्तात् पुरस्ता ददब्धो गोपाः ।

1) 4.7.14.3(1)- अदब्धः । गोपाः । परि ।

अदब्धो गोपा गोपा अदब्धो अदब्धो गोपाः परि परि गोपा अदब्धो अदब्धो गोपाः परि ।

2) 4.7.14.3(2)- गोपाः । परि । पाहि ।

गोपाः परि परि गोपा गोपाः परि पाहि पाहि परि गोपा गोपाः परि पाहि ।

3) 4.7.14.3(2)- गोपाः ।

गोपा इति गो – पाः ।

4) 4.7.14.3(3)- परि । पाहि । नः ।

परि पाहि पाहि परि परि पाहि नो नः पाहि परि परि पाहि नः ।

5) 4.7.14.3(4)- पाहि । नः । त्वम् ॥

पाहि नो नः पाहि पाहि न स्त्वम् त्वम् नः पाहि पाहि न स्त्वम् ।

6) 4.7.14.3(5)- नः । त्वम् ॥

न स्त्वम् त्वम् नो न स्त्वम् ।

7) 4.7.14.3(6)- त्वम् ॥

त्वमिति त्वम् ।

8) 4.7.14.3(7)- प्रत्यञ्चः । यन्तु । निगुतः ।

प्रत्यञ्चो यन्तु यन्तु प्रत्यञ्चः प्रत्यञ्चो यन्तु निगुतो निगुतो यन्तु प्रत्यञ्चः प्रत्यञ्चो यन्तु निगुतः ।

9) 4.7.14.3(8)- यन्तु । निगुतः । पुनः ।

यन्तु निगुतो निगुतो यन्तु यन्तु निगुतः पुनः पुनर् निगुतो यन्तु यन्तु निगुतः पुनः ।

10) 4.7.14.3(9)- निगुतः । पुनः । ते ।

निगुतः पुनः पुनर् निगुतो निगुतः पुन स्ते ते पुनर् निगुतो निगुतः पुन स्ते ।

11) 4.7.14.3(9)– निगुतः ।

निगुत इति नि – गुतः ।

12) 4.7.14.3(10)– पुनः । ते । अमा ।

पुन स्ते ते पुनः पुन स्ते ऽमा ऽमा ते पुनः पुन स्ते ऽमा ।

13) 4.7.14.3(11)– ते । अमा । एषाम् । (GS –4.7–23)

ते ऽमा ऽमा ते ते ऽमैषा मेषा ममा ते ते ऽमैषाम् ।

14) 4.7.14.3(12)– अमा । एषाम् । चित्तम् । (PS12–7,GS –4.7–23)

अमैषा मेषा ममा ऽमैषाम् चित्तम् चित्त मेषा ममा ऽमैषाम् चित्तम् ।

15) 4.7.14.3(13)– एषाम् । चित्तम् । प्रबुधा । (GS –4.7–23)

एषाम् चित्तम् चित्त मेषा मेषाम् चित्तम् प्रबुधा प्रबुधा चित्त मेषा मेषाम् चित्तम् प्रबुधा ।

16) 4.7.14.3(14)– चित्तम् । प्रबुधा । वि । (GS –4.7–23)

चित्तम् प्रबुधा प्रबुधा चित्तम् चित्तम् प्रबुधा वि वि प्रबुधा चित्तम् चित्तम् प्रबुधा वि ।

17) 4.7.14.3(15)– प्रबुधा । वि । नेशत् ॥ (GS –4.7–23)

प्रबुधा वि वि प्रबुधा प्रबुधा वि नेशन् नेशद् वि प्रबुधा प्रबुधा वि नेशत् ।

18) 4.7.14.3(15)– प्रबुधा । (GS –4.7–23)

प्रबुधेति प्र – बुधा ।

19) 4.7.14.3(16)– वि । नेशत् ॥ (GS –4.7–23)

वि नेशन् नेशद् वि वि नेशत् ।

20) 4.7.14.3(17)– नेशत् ॥ (GS –4.7–23)

नेशदिति नेशत् ।

21) 4.7.14.3(18)- धाता । धातॄणाम् । भुवनस्य ।

धाता धातॄणाम् धातॄणाम् धाता धाता धातॄणाम् भुवनस्य भुवनस्य धातॄणाम् धाता धाता धातॄणाम् भुवनस्य ।

22) 4.7.14.3(19)- धातॄणाम् । भुवनस्य । यः ।

धातॄणाम् भुवनस्य भुवनस्य धातॄणाम् धातॄणाम् भुवनस्य यो यो भुवनस्य धातॄणाम् धातॄणाम् भुवनस्य यः ।

23) 4.7.14.3(20)- भुवनस्य । यः । पतिः । (GS -4.7-24)

भुवनस्य यो यो भुवनस्य भुवनस्य य स्पतिष् पतिर् यो भुवनस्य भुवनस्य य स्पतिः ।

24) 4.7.14.3(21)- यः । पतिः । देवम् । (GS -4.7-24)

यस्पतिष् पतिर् यो य स्पतिर् देवम् देवम् पतिर् यो य स्पतिर् देवम् ।

25) 4.7.14.3(22)- पतिः । देवम् । सवितारम् । (GS -4.7-24)

पतिर् देवम् देवम् पतिष् पतिर् देव(ग्म्) सवितार(ग्म्) सवितारम् देवम् पतिष् पतिर् देव(ग्म्) सवितारम् ।

26) 4.7.14.3(23)- देवम् । सवितारम् । अभिमातिषाहम् ॥ (GS -4.7-24)

देव(ग्म्) सवितार(ग्म्) सवितारम् देवम् देव(ग्म्) सवितार मभिमातिषाह मभिमातिषाह(ग्म्) सवितारम् देवम् देव(ग्म्) सवितार मभिमातिषाहम् ।

27) 4.7.14.3(24)- सवितारम् । अभिमातिषाहम् ॥

सवितार मभिमातिषाह मभिमातिषाह(ग्म्) सवितार(ग्म्) सवितार मभिमातिषाहम् ।

28) 4.7.14.3(25)- अभिमातिषाहम् ॥

अभिमातिषाहमित्यभिमाति - साहम् ।

29) 4.7.14.3(26)– इमम् । यज्ञम् । अश्विना ।

इमं ँयज्ञं ँयज्ञ मिम मिमं ँयज्ञ मश्विना ऽश्विना यज्ञ मिम मिमं ँयज्ञ मश्विना ।

30) 4.7.14.3(27)– यज्ञम् । अश्विना । उभा । (GS –4.7–25)

यज्ञ मश्विना ऽश्विना यज्ञं ँयज्ञ मश्विनोभोभा ऽश्विना यज्ञं ँयज्ञ मश्विनोभा ।

31) 4.7.14.3(28)– अश्विना । उभा । बृहस्पतिः । (GS –4.7–25)

अश्विनोभोभा ऽश्विना ऽश्विनोभा बृहस्पतिर् बृहस्पति रुभा ऽश्विना ऽश्विनोभा बृहस्पतिः ।

32) 4.7.14.3(29)– उभा । बृहस्पतिः । देवाः । (GS –4.7–25)

उभा बृहस्पतिर् बृहस्पति रुभोभा बृहस्पतिर् देवा देवा बृहस्पति रुभोभा बृहस्पतिर् देवाः ।

33) 4.7.14.3(30)– बृहस्पतिः । देवाः । पान्तु । (GS –4.7–25)

बृहस्पतिर् देवा देवा बृहस्पतिर् बृहस्पतिर् देवाः पान्तु पान्तु देवा बृहस्पतिर् बृहस्पतिर् देवाः पान्तु ।

34) 4.7.14.3(31)– देवाः । पान्तु । यजमानम् ।

देवाः पान्तु पान्तु देवा देवाः पान्तु यजमानं ँयजमानम् पान्तु देवा देवाः पान्तु यजमानम् ।

35) 4.7.14.3(32)– पान्तु । यजमानम् । न्यर्त्थात् ॥

पान्तु यजमानं ँयजमानम् पान्तु पान्तु यजमानं न्यर्त्थान् न्यर्त्थाद् यजमानम् पान्तु पान्तु यजमानं न्यर्त्थात् ।

36) 4.7.14.3(33)– यजमानम् । न्यर्त्थात् ॥

यजमानं न्यर्त्थान् न्यर्त्थाद् यजमानं ँयजमानं न्यर्त्थात् ।

37) 4.7.14.3(34)– न्यर्त्थात् ॥

न्यर्त्थादिति नि – अर्त्थात् ।

38) 4.7.14.3(35)- उरुव्यचाः । नः । महिषः ।

उरुव्यचा नो न उरुव्यचा उरुव्यचा नो महिषो महिषो न उरुव्यचा उरुव्यचा नो महिषः ।

39) 4.7.14.3(35)- उरुव्यचाः ।

उरुव्यचा इत्युरु - व्यचाः ।

40) 4.7.14.3(36)- नः । महिषः । शर्म ।

नो महिषो महिषो नो नो महिषः शर्म शर्म महिषो नो नो महिषः शर्म ।

41) 4.7.14.3(37)- महिषः । शर्म । य(ग्म्)सत् ।

महिषः शर्म शर्म महिषो महिषः शर्म य(ग्म्)सद् य(ग्म्)स च्छर्म महिषो महिषः शर्म य(ग्म्)सत् ।

42) 4.7.14.3(38)- शर्म । य(ग्म्)सत् । अस्मिन्न् । (GS -4.7-26)

शर्म य(ग्म्)सद् य(ग्म्)स च्छर्म शर्म य(ग्म्)स दस्मिन् नस्मिन्. य(ग्म्)स च्छर्म शर्म य(ग्म्)स दस्मिन्न् ।

43) 4.7.14.3(39)- य(ग्म्)सत् । अस्मिन्न् । हवे । (GS -4.7-26)

य(ग्म्)स दस्मिन् नस्मिन्. य(ग्म्)सद् य(ग्म्)स दस्मिन्. हवे हवे अस्मिन्. य(ग्म्)सद् य(ग्म्)स दस्मिन्. हवे ।

44) 4.7.14.3(40)- अस्मिन्न् । हवे । पुरुहूतः । (GS -4.7-26)

अस्मिन्. हवे हवे अस्मिन् नस्मिन्. हवे पुरुहूतः पुरुहूतो हवे अस्मिन् नस्मिन्. हवे पुरुहूतः ।

45) 4.7.14.3(41)- हवे । पुरुहूतः । पुरुक्षु ॥ (GS -4.7-26)

हवे पुरुहूतः पुरुहूतो हवे हवे पुरुहूतः पुरुक्षु पुरुक्षु पुरुहूतो हवे हवे पुरुहूतः पुरुक्षु ।

46) 4.7.14.3(42)– पुरुहूतः । पुरुक्षु ॥ (GS –4.7–26)

पुरुहूतः पुरुक्षु पुरुक्षु पुरुहूतः पुरुहूतः पुरुक्षु ।

47) 4.7.14.3(42)– पुरुहूतः । (GS –4.7–26)

पुरुहूत इति पुरु – हूतः ।

48) 4.7.14.3(43)– पुरुक्षु ॥

पुरुक्ष्विति पुरुक्षु ।

49) 4.7.14.3(44)– सः । नः । प्रजायै ।

स नो नः स स नः प्रजायै प्रजायै नः स स नः प्रजायै ।

50) 4.7.14.3(45)– नः । प्रजायै । हर्यश्व ।

नः प्रजायै प्रजायै नो नः प्रजायै हर्यश्व हर्यश्व प्रजायै नो नः प्रजायै हर्यश्व ।

51) 4.7.14.3(46)– प्रजायै । हर्यश्व । मृडय ।

प्रजायै हर्यश्व हर्यश्व प्रजायै प्रजायै हर्यश्व मृडय मृडय हर्यश्व प्रजायै प्रजायै हर्यश्व मृडय ।

52) 4.7.14.3(46)– प्रजायै ।

प्रजाया इति प्र – जायै ।

53) 4.7.14.3(47)– हर्यश्व । मृडय । इन्द्र ।

हर्यश्व मृडय मृडय हर्यश्व हर्यश्व मृड येन्द्रेन्द्र मृडय हर्यश्व हर्यश्व मृडयेन्द्र ।

54) 4.7.14.3(47)– हर्यश्व ।

हर्यश्वेति हरि – अश्व ।

55) 4.7.14.3(48)– मृडय । इन्द्र । मा ।

मृड येन्द्रेन्द्र मृडय मृडयेन्द्र मा मेन्द्र मृडय मृडयेन्द्र मा ।

56) 4.7.14.3(49)- इन्द्र । मा । नः ।

इन्द्र मा मेन्द्रेन्द्र मा नो नो मेन्द्रेन्द्र मा नः ।

57) 4.7.14.3(50)- मा । नः । रीरिषः ।

मा नो नो मा मा नो रीरिषो रीरिषो नो मा मा नो रीरिषः ।

1) 4.7.14.4(1)- नः । रीरिषः । मा ।

नो रीरिषो रीरिषो नो नो रीरिषो मा मा रीरिषो नो नो रीरिषो मा ।

2) 4.7.14.4(2)- रीरिषः । मा । परा ।

रीरिषो मा मा रीरिषो रीरिषो मा परा परा मा रीरिषो रीरिषो मा परा ।

3) 4.7.14.4(3)- मा । परा । दाः ॥

मा परा परा मा मा परा दा दाः परा मा मा परा दाः ।

4) 4.7.14.4(4)- परा । दाः ॥

परा दा दाः परा परा दाः ।

5) 4.7.14.4(5)- दाः ॥

दा इति दाः ।

6) 4.7.14.4(6)- ये । नः । सपत्नाः ।

ये नो नो ये ये नः सपत्नाः सपत्ना नो ये ये नः सपत्नाः ।

7) 4.7.14.4(7)- नः । सपत्नाः । अप ।

नः सपत्नाः सपत्ना नो नः सपत्ना अपाप सपत्ना नो नः सपत्ना अप ।

8) 4.7.14.4(8)- सपत्नाः । अप । ते ।

सपत्ना अपाप सपत्नाः सपत्ना अप ते ते अप सपत्नाः सपत्ना अप ते ।

9) 4.7.14.4(9)– अप । ते । भवन्तु ।

अप ते ते अपाप ते भवन्तु भवन्तु ते अपाप ते भवन्तु ।

10) 4.7.14.4(10)– ते । भवन्तु । इन्द्राग्निभ्याम् ।

ते भवन्तु भवन्तु ते ते भवन् त्विन्द्राग्निभ्या मिन्द्राग्निभ्याम् भवन्तु ते ते भवन् त्विन्द्राग्निभ्याम् ।

11) 4.7.14.4(11)– भवन्तु । इन्द्राग्निभ्याम् । अव ।

भवन् त्विन्द्राग्निभ्या मिन्द्राग्निभ्याम् भवन्तु भवन् त्विन्द्राग्निभ्या मवावेन्द्राग्निभ्याम् भवन्तु भवन् त्विन्द्राग्निभ्या मव ।

12) 4.7.14.4(12)– इन्द्राग्निभ्याम् । अव । बाधामहे । (GS –4.7–27)

इन्द्राग्निभ्या मवावेन्द्राग्निभ्या मिन्द्राग्निभ्या मव बाधामहे बाधामहे ऽवेन्द्राग्निभ्या मिन्द्राग्निभ्या मव बाधामहे ।

13) 4.7.14.4(12)– इन्द्राग्निभ्याम् । (GS –4.7–27)

इन्द्राग्निभ्यामितीन्द्राग्नि – भ्याम् ।

14) 4.7.14.4(13)– अव । बाधामहे । तान् ॥ (GS –4.7–27)

अव बाधामहे बाधामहे ऽवाव बाधामहे ता(गग्) स्तान् बाधामहे ऽवाव बाधामहे तान् ।

15) 4.7.14.4(14)– बाधामहे । तान् ॥ (GS –4.7–27)

बाधामहे ता(गग्) स्तान् बाधामहे बाधामहे तान् ।

16) 4.7.14.4(15)– तान् ॥ (GS –4.7–27)

तानिति तान् ।

17) 4.7.14.4(16)– वसवः । रुद्राः । आदित्याः ।

वसवो रुद्रा रुद्रा वसवो वसवो रुद्रा आदित्या आदित्या रुद्रा वसवो वसवो रुद्रा आदित्याः ।

18) 4.7.14.4(17)- रुद्राः । आदित्याः । उपरिस्पृशम् ।

रुद्रा आदित्या आदित्या रुद्रा रुद्रा आदित्या उपरिस्पृश मुपरिस्पृश मादित्या रुद्रा रुद्रा आदित्या उपरिस्पृशम् ।

19) 4.7.14.4(18)- आदित्याः । उपरिस्पृशम् । मा ।

आदित्या उपरिस्पृश मुपरिस्पृश मादित्या आदित्या उपरिस्पृशम् मा मोपरिस्पृश मादित्या आदित्या उपरिस्पृशम् मा ।

20) 4.7.14.4(19)- उपरिस्पृशम् । मा । उग्रम् । (GS -4.7-28)

उपरिस्पृशम् मा मोपरिस्पृश मुपरिस्पृशम् मोग्र मुग्रम् मोपरिस्पृश मुपरिस्पृशम् मोग्रम् ।

21) 4.7.14.4(19)- उपरिस्पृशम् । (GS -4.7-28)

उपरिस्पृशमित्युपरि - स्पृशम् ।

22) 4.7.14.4(20)- मा । उग्रम् । चेत्तारम् । (GS -4.7-28)

मोग्र मुग्रम् मा मोग्रम् चेत्तारम् चेत्तार मुग्रम् मा मोग्रम् चेत्तारम् ।

23) 4.7.14.4(21)- उग्रम् । चेत्तारम् । अधिराजम् । (GS -4.7-28)

उग्रम् चेत्तारम् चेत्तार मुग्र मुग्रम् चेत्तार मधिराज मधिराजम् चेत्तार मुग्र मुग्रम् चेत्तार मधिराजम् ।

24) 4.7.14.4(22)- चेत्तारम् । अधिराजम् । अक्रन्न् ॥ (GS -4.7-28)

चेत्तार मधिराज मधिराजम् चेत्तारम् चेत्तार मधिराज मक्रन् नक्रन् नधिराजम् चेत्तारम् चेत्तार मधिराज मक्रन्न् ।

25) 4.7.14.4(23)- अधिराजम् । अक्रन्न् ॥

अधिराज मक्रन् नक्रन् नधिराज मधिराज मक्रन्न् ।

26) 4.7.14.4(23)– अधिराजम् ।

अधिराजमित्यधि – राजम् ।

27) 4.7.14.4(24)– अक्रन्न् ॥

अक्रन्नित्यक्रन्न् ।

28) 4.7.14.4(25)– अर्वाञ्चम् । इन्द्रम् । अमुतः ।

अर्वाञ्च मिन्द्र मिन्द्र मर्वाञ्च मर्वाञ्च मिन्द्र ममुतो अमुत इन्द्र मर्वाञ्च मर्वाञ्च मिन्द्र ममुतः ।

29) 4.7.14.4(26)– इन्द्रम् । अमुतः । हवामहे ।

इन्द्र ममुतो अमुत इन्द्र मिन्द्र ममुतो हवामहे हवामहे अमुत इन्द्र मिन्द्र ममुतो हवामहे ।

30) 4.7.14.4(27)– अमुतः । हवामहे । यः ।

अमुतो हवामहे हवामहे अमुतो अमुतो हवामहे यो यो हवामहे अमुतो अमुतो हवामहे यः ।

31) 4.7.14.4(28)– हवामहे । यः । गोजित् ।

हवामहे यो यो हवामहे हवामहे यो गोजिद् गोजिद् यो हवामहे हवामहे यो गोजित् ।

32) 4.7.14.4(29)– यः । गोजित् । धनजित् ।

यो गोजिद् गोजिद् यो यो गोजिद् धनजिद् धनजिद् गोजिद् यो यो गोजिद् धनजित् ।

33) 4.7.14.4(30)– गोजित् । धनजित् । अश्वजित् ।

गोजिद् धनजिद् धनजिद् गोजिद् गोजिद् धनजि दश्वजि दश्वजिद् धनजिद् गोजिद् गोजिद् धनजि दश्वजित् ।

34) 4.7.14.4(30)– गोजित् ।

गोजिदिति गो – जित् ।

35) 4.7.14.4(31)- धनजित् । अश्वजित् । यः ॥

धनजि दश्वजि दश्वजिद् धनजिद् धनजि दश्वजिद् यो यो अश्वजिद् धनजिद् धनजि दश्वजिद् यः ।

36) 4.7.14.4(31)- धनजित् ।

धनजिदिति धन - जित् ।

37) 4.7.14.4(32)- अश्वजित् । यः ॥

अश्वजिद् यो यो अश्वजि दश्वजिद् यः ।

38) 4.7.14.4(32)- अश्वजित् ।

अश्वजिदित्यश्व - जित् ।

39) 4.7.14.4(33)- यः ॥

य इति यः ।

40) 4.7.14.4(34)- इमम् । नः । यज्ञम् ।

इमम् नो न इम मिमम् नो यज्ञं ँयज्ञम् न इम मिमम् नो यज्ञम् ।

41) 4.7.14.4(35)- नः । यज्ञम् । विहवे ।

नो यज्ञं ँयज्ञम् नो नो यज्ञं ँविहवे विहवे यज्ञम् नो नो यज्ञं ँविहवे ।

42) 4.7.14.4(36)- यज्ञम् । विहवे । जुषस्व ।

यज्ञं ँविहवे विहवे यज्ञं ँयज्ञं ँविहवे जुषस्व जुषस्व विहवे यज्ञं ँयज्ञं ँविहवे जुषस्व ।

43) 4.7.14.4(37)- विहवे । जुषस्व । अस्य ।

विहवे जुषस्व जुषस्व विहवे विहवे जुषस्वा स्यास्य जुषस्व विहवे विहवे जुषस्वास्य ।

44) 4.7.14.4(37)- विहवे ।

विहव इति वि - हवे ।

45) 4.7.14.4(38)- जुषस्व । अस्य । कुर्मः ।

जुषस्वा स्यास्य जुषस्व जुषस्वास्य कुर्मः कुर्मो अस्य जुषस्व जुषस्वास्य कुर्मः ।

46) 4.7.14.4(39)- अस्य । कुर्मः । हरिवः ।

अस्य कुर्मः कुर्मो अस्यास्य कुर्मो हरिवो हरिवः कुर्मो अस्यास्य कुर्मो हरिवः ।

47) 4.7.14.4(40)- कुर्मः । हरिवः । मेदिनम् ।

कुर्मो हरिवो हरिवः कुर्मः कुर्मो हरिवो मेदिनम् मेदिन(ग्म्) हरिवः कुर्मः कुर्मो हरिवो मेदिनम् ।

48) 4.7.14.4(41)- हरिवः । मेदिनम् । त्वा ॥

हरिवो मेदिनम् मेदिन(ग्म्) हरिवो हरिवो मेदिनम् त्वा त्वा मेदिन(ग्म्) हरिवो हरिवो मेदिनम् त्वा ।

49) 4.7.14.4(41)- हरिवः ।

हरिव इति हरि - वः ।

50) 4.7.14.4(42)- मेदिनम् । त्वा ॥

मेदिनम् त्वा त्वा मेदिनम् मेदिनम् त्वा ।

51) 4.7.14.4(43)- त्वा ॥

त्वेति त्वा ।

===========

## 4.7.15 अनुवाकम् 15 – घनम्

1) 4.7.15.1(1)– अग्नेः । मन्वे । प्रथमस्य । (GS –4.7–29)

अग्नेर् मन्वे मन्वे अग्ने रग्नेर् मन्वे प्रथमस्य प्रथमस्य मन्वे अग्ने रग्नेर् मन्वे प्रथमस्य ।

2) 4.7.15.1(2)– मन्वे । प्रथमस्य । प्रचेतसः । (GS –4.7–29)

मन्वे प्रथमस्य प्रथमस्य मन्वे मन्वे प्रथमस्य प्रचेतसः प्रचेतसः प्रथमस्य मन्वे मन्वे प्रथमस्य प्रचेतसः ।

3) 4.7.15.1(3)– प्रथमस्य । प्रचेतसः । यम् । (GS –4.7–29)

प्रथमस्य प्रचेतसः प्रचेतसः प्रथमस्य प्रथमस्य प्रचेतसो यं ँयम् प्रचेतसः प्रथमस्य प्रथमस्य प्रचेतसो यम् ।

4) 4.7.15.1(4)– प्रचेतसः । यम् । पाञ्चजन्यम् ।

प्रचेतसो यं ँयम् प्रचेतसः प्रचेतसो यम् पाञ्चजन्यम् पाञ्चजन्यं ँयम् प्रचेतसः प्रचेतसो यम् पाञ्चजन्यम् ।

5) 4.7.15.1(4)– प्रचेतसः ।

प्रचेतस इति प्र – चेतसः ।

6) 4.7.15.1(5)– यम् । पाञ्चजन्यम् । बहवः ।

यम् पाञ्चजन्यम् पाञ्चजन्यं ँयं ँयम् पाञ्चजन्यम् बहवो बहवः पाञ्चजन्यं ँयं ँयम् पाञ्चजन्यम् बहवः ।

7) 4.7.15.1(6)– पाञ्चजन्यम् । बहवः । समिन्धते ॥

पाञ्चजन्यम् बहवो बहवः पाञ्चजन्यम् पाञ्चजन्यम् बहवः समिन्धते समिन्धते बहवः पाञ्चजन्यम् पाञ्चजन्यम् बहवः समिन्धते ।

8) 4.7.15.1(6)– पाञ्चजन्यम् ।

पाञ्चजन्यमिति पाञ्च – जन्यम् ।

9) 4.7.15.1(7)– बहवः । समिन्धते ॥

बहवः समिन्धते समिन्धते बहवो बहवः समिन्धते ।

10) 4.7.15.1(8)– समिन्धते ॥

समिन्धत इति सम् – इन्धते ।

11) 4.7.15.1(9)– विश्वस्याम् । विशि । प्रविविविशिवा(ग्म्)सम् ।

विश्वस्यां ँविशि विशि विश्वस्यां ँविश्वस्यां ँविशि प्रविविविशिवा(ग्म्)सम् प्रविविविशिवा(ग्म्)सं ँविशि विश्वस्यां ँविश्वस्यां ँविशि प्रविविविशिवा(ग्म्)सम् ।

12) 4.7.15.1(10)– विशि । प्रविविविशिवा(ग्म्)सम् । ईमहे ।

विशि प्रविविविशिवा(ग्म्)सम् प्रविविविशिवा(ग्म्)सं ँविशि विशि प्रविविविशिवा(ग्म्)स मीमह ईमहे प्रविविविशिवा(ग्म्)सं ँविशि विशि प्रविविविशिवा(ग्म्)स मीमहे ।

13) 4.7.15.1(11)– प्रविविविशिवा(ग्म्)सम् । ईमहे । सः ।

प्रविविविशिवा(ग्म्)स मीमह ईमहे प्रविविविशिवा(ग्म्)सम् प्रविविविशिवा(ग्म्)स मीमहे स स ईमहे प्रविविविशिवा(ग्म्)सम् प्रविविविशिवा(ग्म्)स मीमहे सः ।

14) 4.7.15.1(11)– प्रविविविशिवा(ग्म्)सम् ।

प्रविविविशिवा(ग्म्)समिति प्र – विविविशिवा(ग्म्)सम् ।

15) 4.7.15.1(12)– ईमहे । सः । नः ।

ईमहे स स ईमह ईमहे स नो नः स ईमह ईमहे स नः ।

16) 4.7.15.1(13)– सः । नः । मुञ्चतु । (GS –4.7–30)

स नो नः स स नो मुञ्चतु मुञ्चतु नः स स नो मुञ्चतु ।

17) 4.7.15.1(14)- नः । मुञ्चतु । अ(ग्म्)हसः ॥ (GS -4.7-30)

नो मुञ्चतु मुञ्चतु नो नो मुञ्च त्व(ग्म्)हसो अ(ग्म्)हसो मुञ्चतु नो नो मुञ्च त्व(ग्म्)हसः ।

18) 4.7.15.1(15)- मुञ्चतु । अ(ग्म्)हसः ॥ (GS -4.7-30)

मुञ्च त्व(ग्म्)हसो अ(ग्म्)हसो मुञ्चतु मुञ्च त्व(ग्म्)हसः ।

19) 4.7.15.1(16)- अ(ग्म्)हसः ॥ (GS -4.7-30)

अ(ग्म्)हस इत्य(ग्म्)हसः ।

20) 4.7.15.1(17)- यस्य । इदम् । प्राणत् ।

यस्येद मिदं ँयस्य यस्ये दम् प्राणत् प्राणदिदं ँयस्य यस्येदम् प्राणत् ।

21) 4.7.15.1(18)- इदम् । प्राणत् । निमिषत् ।

इदम् प्राणत् प्राणदिद मिदम् प्राणन् निमिषन् निमिषत् प्राणदिद मिदम् प्राणन् निमिषत् ।

22) 4.7.15.1(19)- प्राणत् । निमिषत् । यत् ।

प्राणन् निमिषन् निमिषत् प्राणत् प्राणन् निमिषद् यद् यन् निमिषत् प्राणत् प्राणन् निमिषद् यत् ।

23) 4.7.15.1(19)- प्राणत् ।

प्राणदिति प्र - अनत् ।

24) 4.7.15.1(20)- निमिषत् । यत् । एजति । (GS -4.7-31)

निमिषद् यद् यन् निमिषन् निमिषद् य देज त्येजति यन् निमिषन् निमिषद् य देजति ।

25) 4.7.15.1(20)- निमिषत् । (GS -4.7-31)

निमिषदिति नि - मिषत् ।

26) 4.7.15.1(21)- यत् । एजति । यस्य । (GS -4.7-31)

य देज त्येजति यद् यदेजति यस्य यस्यैजति यद् यदेजति यस्य ।

27) 4.7.15.1(22)- एजति । यस्य । जातम् । (GS -4.7-31)

एजति यस्य यस्यैज त्येजति यस्य जातम् जातं ँयस्यैज त्येजति यस्य जातम् ।

28) 4.7.15.1(23)- यस्य । जातम् । जनमानम् । (GS -4.7-31)

यस्य जातम् जातं ँयस्य यस्य जातम् जनमानम् जनमानम् जातं ँयस्य यस्य जातम् जनमानम् ।

29) 4.7.15.1(24)- जातम् । जनमानम् । च । (GS -4.7-31)

जातम् जनमानम् जनमानम् जातम् जातम् जनमानम् च च जनमानम् जातम् जातम् जनमानम् च ।

30) 4.7.15.1(25)- जनमानम् । च । केवलम् ॥ (GS -4.7-31)

जनमानम् च च जनमानम् जनमानम् च केवलम् केवलम् च जनमानम् जनमानम् च केवलम् ।

31) 4.7.15.1(26)- च । केवलम् ॥

च केवलम् केवलम् च च केवलम् ।

32) 4.7.15.1(27)- केवलम् ॥

केवलमिति केवलम् ।

33) 4.7.15.1(28)- स्तौमि । अग्निम् । नाथितः ।

